पूर्वदेशंसरतीतिपूर्वसारः। कृञोहेतुताच्छील्यानुलोम्येषु। एषुद्योत्येषुकरोतेष्टःस्यात्। अतःकृकमीतिसः। यशस्करीविद्या। श्राद्धक ह
रः। वचनकरः। दिवाविभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुर प्र
ष्कृषु। एषुकृञःटःस्यात्। अहेत्वादावपि। दिवाकरः। विभाकरः। निशाकरः। कस्कादित्वात्सः। भास्करः। प्रभाकरः। अंतकरः। अनंतकरः।
आदिकरः। बहुकरः। बहुशब्दस्यवैपुल्यार्थसंख्यापक्षयाःपृथग्ग्रहणं। लिपिलिबिशब्दौपर्यायौ। संख्या। एककरः। द्विकरः। कस्कादि
त्वादहस्करः। नित्यंसमासेनुत्तरपदस्थस्येतिषत्वं। धनुष्करः। अरुष्करः। किंयत्तद्बहुषुकृञोऽज्विधानमितिवार्त्तिकं। किंकरा। य
हला त्करा। तत्करा। द्विटंबाधित्वापरत्वादच्। पुंयोगेङीष्। किंकरी। कर्मणिभृतौ। कर्मशब्दउपपदेकरोतेष्टःस्यात्। कर्मकरोभृतकः। कर्मका
रोन्यः। नशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु। एषुकृञष्टोन। हेत्वादिषुप्राप्तःप्रतिषिध्यते। शब्दकारइत्यादि। स्तंबशकृ

सि॰कौ॰उ रोकुयंक्रुमंजिपुंजिपरमेबर्हिर्दिव्यग्निस्यस्थः। स्यइतिकप्रत्ययांतस्यानुकरणं। षष्ठ्यर्थेप्रथमा। स्थःस्थस्यसस्यषःस्यात्। अंबष्ठः। आंबष्ठः।
७२ द्विष्ठः। त्रिष्ठः। द्वतउपर्येकर्मणिस्रूपीतिद्वयमप्यनुवर्तते। तत्राकर्मकेषुस्रूपीत्यस्यसंबंधः। तुंदशोकयोःपरिमृजापनुदोः। तुंदशोकयोःक
र्मणोरुपपदयोराभ्यांकःस्यात्। आलस्यसुखाहरणयोरितिवक्तव्यं। तुंदंपरिमार्ष्टितुंदपरिमृजोऽलसः। शोकापनुदः। सुखस्याहर्त्ता। यो
छंद अलसादन्यत्रतुंदपरिमार्ज एव। यस्तुसंसारासारत्वोपदेशेनशोकमनुदतिसशोकापनोदः। कप्रकरणेमूलविभुजादिभ्यउपसंख्यानं।
मूलानिविभुजतिमूलविभुजोरथः। आकृतिगणोयं। महीध्रः। कुध्रः। गिलतीतिगिलः। प्रेदाज्ञः। दारूपाज्ज्ञानाश्चप्रोपसृष्टात्कर्मणि
उपपदेकःस्यादणोपवादः। सर्वप्रदः। पथिप्रज्ञः। अनुपसर्गइत्येव। प्रादन्यस्मिन्सतिनकः। गोसंप्रदायः। समिख्यः। गोसंख्यः। गा
पोष्टक्। अनुपसर्गाभ्यामाभ्यांटक्स्यात्कर्मण्युपपदे। सामगः। सामगी। उपसर्गेतुसामसंगायः। पिबतेःसुराशीध्वोरितिवाच्यं।।
सुरापीशीधुपी। अन्यत्रक्षीरपा। ब्राह्मणी।। सुरांपातिरक्षतीतिसुरापा। हरतेरनुद्यमनेच्। अंशहरः। अनुद्यमनेकिं। भारहारः। शक्ति
लांगलांकुशतोमरयष्टिघटघटीधनुष्षुग्रहेरुपसंख्यानं। शक्तिग्रहः। लांगलग्रहः। सूत्रेचधार्यर्थे। सूत्रग्रहः। यस्तुसूत्रंकेवलमुपा
दत्तेनतुधारयतितत्राणेव। सूत्रग्राहः। वयसिच। उद्यमनार्थसूत्रं। कवचहरः। कुमारः। आङिताच्छील्ये। पुष्पाण्याहरतितच्छीलःपु
ष्पाहरः। ताच्छील्येकिं। भाराहारः। अर्हः। अर्हतेरच्स्यात्। कर्मण्युपपदेऽणोपवादः। पूजार्हाब्राह्मणी।। स्तंबकर्णयोरमिजपोः। हस्ति
सूचकयोरितिवक्तव्यं। स्तंबेरमतेस्तंबेरमोहस्ती। तत्पुरुषेकृतीतिहलदंतादितिवाऽलुक्। कर्णेजपःसूचकः। शमिधातोःसं श्रीः
ज्ञायां। शंभवः। शंवदः। पुनर्धातुग्रहणंबाधकविषयेपिप्रवृत्त्यर्थं। कृञोहेत्वादिषुटोमाभूत्। शंकरानामपरिव्राजिकातच्छीला ७२

अधिकरणेशेतेः। खेशेतेखशयः। पार्श्वादिषूपसंख्यानं। पार्श्वाभ्यांशेतेपार्श्वशयः। पृष्ठशयः। उदरेणशेतेउदरशयः। उत्तानादिषुकर्तृषु
उत्तानःशेतेउत्तानशयः। अवमूर्धशयः। अवनतोमूर्धायस्यसःअवमूर्धा। अधोमुखःशेतेइत्यर्थः। गिरौडश्छंदसि। गिरौशेतेगिरिशः।। कथं
तर्हिगिरिशमुपचचारप्रत्यहंसासुकेशीतिगिरिरस्यास्तीतिविग्रहेलोमादित्वाच्छः। चरेष्टः। अधिकरणउपपदे। कुरुचरः। कुरुचरी। भिक्षासेना
दायेषुच। भिक्षांचरतीतिभिक्षाचरः। सेनाचरः। आदायेतिल्यबंतं। आदायचरः। कथंप्रेक्ष्यस्थितांसहचरीमिति। पचादिषुचरडितिपाठात्
पुरोग्रतोग्रेषुसर्त्तेः। पुरःसरः। अग्रतःसरः। अग्रमग्रेणाग्रेवासरतीतिअग्रेसरः। सूत्रेऽग्रइतिएदंतमितिनिपात्यते। कथंतर्हिभूयंतदग्रसर व५
वितत्कुसुमसारमिति। बाहुलकादितिहरदत्तः। पूर्वेकर्तरि। कर्तृवाचिनिपूर्वशब्दउपपदेसर्त्तेष्टःस्यात्। पूर्वःसरतीतिपूर्वसरः। कर्तरिकिं
पूर्वदेशंसरतीतिपूर्वसारः। कृञोहेतुताच्छील्यानुलोम्येषु। एषुद्योत्येषुकरोतेष्टःस्यात्। अतःकृकमीतिसः। यशस्करीविद्या। श्राद्धक
रः। वचनकरः। दिवाविभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुर रु
ष्षु। एषुकृञष्टःस्यात्। अहेत्वादावपि। दिवाकरः। विभाकरः। निशाकरः। कस्कादित्वात्सः। भास्करः। प्रभाकरः। अंतकरः। अनंतकरः। प्र
आदिकरः। बहुकरः। बहुशब्दस्यवैपुल्यार्थसंख्यापक्षयापृथग्ग्रहणं। लिपिलिबिशब्दौपर्यायौ। संख्या एककरः। द्विकरः। कस्कादि
त्वादहस्करः। नित्यंसमासेनुत्तरपदस्थस्येतिषत्वं। धनुष्करः। अरुष्करः। किंयत्तद्बहुषुकृञोऽज्विधानमितिवार्त्तिकं। किंकरा। य
हत्या त्करा। तत्करा। टापित्वापचत्वादच्। पुंयोगेङीष्। किंकरी। कर्मणिभृतौ। कर्मशब्दउपपदेकरोतेष्टःस्यात्। कर्मकरोभृतकः। कर्मका
रोन्यः। नशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु। एषुकृञष्टोन। हेत्वादिषुप्राप्तःप्रतिषिध्यते। शब्दकारइत्यादि। स्तंबशकृ

सि·ति·उ· ७२ तोरिन्॥ व्रीहिवत्सयोरिति वक्तव्यं॥ स्तंबकरिर्व्रीहिः॥ शकृत्करिर्वत्सः॥ व्रीहिवत्सयोः किं॥ स्तंबकारः॥ शकृत्कारः॥ हरतेर्दृतिनाथयोः पशौ॥ दृतिना
थयोरुपपदयोः हृञ इन् स्यात्॥ पशौ कर्तरि॥ दृतिं हरतीति दृतिहरिः॥ नाथं नासारज्जुं हरतीति नाथहरिः॥ पशौ किं॥ दृतिहारः॥ नाथहारः॥ फ
लेग्रहिरात्मंभरिश्च॥ फलानि गृह्णातीति फलेग्रहिः॥ उपपदस्यैदंतत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते॥ आत्मानं बिभर्तीति आत्मंभरिः॥ आत्मनो मु
मागमश्चात्र॥ कुक्षिंभरिः॥ चांद्रास्तु॥ आत्मोदरकुक्षिष्विति पेठुः॥ ज्योत्स्नाकरं ममुदरंभर इत्यस्य को रक्ष इति मुरारिः॥ एजेः खश्॥ ण्यं
तादेजेः खश् स्यात्॥ अरुर्द्विषदजंतस्य मुम्॥ अरुषो द्विषतोऽजंतस्य च मुमागमः स्यात् खिदंते उत्तरपदे॥ न त्वव्ययस्य॥ शित्त्वाच्छबादिः॥
जनं एजयतीति जनमेजयः॥ वातशुनीतिलशर्धेषु अजधेट्तुदजहातिभ्यः खश उपसंख्यानम्॥ वातमजा मृगाः॥ खित्यनव्ययस्य॥ खि
दंते परे पूर्वपदस्य ह्रस्वः स्यात् ततो मुम्॥ शुनिंधयः॥ तिलंतुदः॥ शर्धंजहा माषाः॥ शर्द्धोऽपानशब्दः॥ तं जहातीति विग्रहः॥ जहातिरंतर्भा
वितण्यर्थः॥ नासिकास्तनयोर्ध्माधेटोः॥ अत्र वार्तिकं॥ स्तने धेटो नासिकायां ध्मश्चेति वाच्यम्॥ स्तनं धयतीति स्तनंधयः॥ धेट् टित्त्वात् स्त
नंधयी॥ नासिकंधमः॥ नासिकंधयः॥ नाडीमुष्ट्योश्च॥ एतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् स्यात् यथासंख्यं नेष्यते॥ नाडिंधमः॥
नाडिंधयः॥ मुष्टिंधमः॥ मुष्टिंधयः॥ घटीखारीखरीषूपसंख्यानं॥ घटिंधमः॥ घटिंधयः॥ इत्यादि॥ खारी परिमाणविशेषः॥ खरी गर्दभी॥
उदि कूले रुजिवहोः॥ उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात्॥ कूलमुद्रुजतीति कूलमुद्रुजः॥ कूलमुद्वहः॥ वहाभ्रे लिहः॥ श्रीः
वहं स्कंधः॥ तं लेढीति वहंलिहो गौः॥ अदादित्वाच्छपो लुक्॥ खशो ङित्वान्न गुणः॥ अभ्रंलिहो वायुः॥ परिमाणे पचः॥ प्रस्थंपचा स्थाली॥ ७२
खारिंपचः कटाहः॥ मितनखे च॥ मितंपचा ब्राह्मणी॥ नखंपचा यवागूः॥ पचिरत्र तापवाची॥ विध्वरुषोस्तुदः॥ विधुंतुदः॥ मुमि कृते संयो

गांतस्य लोपः॥ अरुंतुदः॥ असूर्यललाटयोर्दृशितपोः॥ असूर्यमित्यसामर्थ्यसमासः॥ दृशिना नञः संबंधात्॥ सूर्यं न पश्यंतीत्यसूर्यंपश्या रा
जदाराः॥ ललाटंतपः सूर्यः॥ उग्रंपश्येरंमदपाणिंधमाश्च॥ एते निपात्यंते॥ उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश्॥ उग्रं पश्यतीत्युग्रं
पश्यः॥ इरा उदकं तेन माद्यतीति दीप्यते इति वा धनुत्वादिति॥ इरंमदो मेघज्योतिः॥ इह निपातनात् श्यन्न॥ पाणयो ध्मायंते अस्मिन्निति पाणिंधमोऽध्वा
अंधकारयुक्त इत्यर्थः॥ तत्र हि सर्पाद्यपनोदनाय पाणयः ध्मायंते॥ प्रियवशे वदः खच्॥ प्रियंवदः॥ वशंवदः॥ गमेः सुपि वाच्यः॥ असंज्ञा
मा यामिदं मितंगमो हस्ती॥ विहायसो विह इति वाच्यं॥ खच्॥ डिद्वा वाच्यः॥ विहंगः॥ विहंगमः॥ भुजंगः॥ भुजंगमः॥ द्विषत्परयोस्तापेः॥ खच् स्या
रे त्॥ खचि ह्रस्वः॥ खचपरे णौ उपधाया ह्रस्वः स्यात्॥ द्विषंतं परं वा तापयतीति द्विषंतपः॥ परंतपः॥ परघटीग्रहणाच्छिंग विशिष्टपरिभाषा
नित्यात् तेन हन्॥ द्विषतीतापयतीति द्विषतीतापः॥ वाचि यमो व्रते॥ वाक्शब्द उपपदे यमः खच् व्रतं गम्ये॥ वाचंयमपुरंदरौ च॥ वाक्पुरार
मंतत्वं निपात्यते॥ वाचंयमो मौनव्रती॥ व्रते किं॥ अशक्त्यादिना वाचं यच्छतीति वाग्यामः॥ पूःसर्वयोर्दारिसहोः॥ पुरं दारयतीति पुरंदरः॥
सर्वंसहः॥ सहिग्रहणमसंज्ञार्थं॥ भगेव दारेरिति काशिका॥ वाहुलकेन लब्धमित्याहुः॥ भगं दारयतीति भगंदरः॥ सर्वकूलाभ्रकरीषेषु
कषः॥ सर्वंकषः खलः॥ कूलंकषा नदी॥ अभ्रंकषो वायुः॥ करीषंकषा वात्या॥ मेघर्तिभयेषु कृञः॥ मेघंकरः॥ ऋतिंकरः॥ भयंकरः॥ भ
यशब्देन तदंतविधिः॥ अभयंकरः॥ क्षेमप्रियमद्रेऽण् च॥ एषु कृञोऽण् स्यात्॥ चात् खच्॥ क्षेमंकरः॥ क्षेमकारः॥ प्रियंकरः॥ प्रियकारः॥
मद्रंकरः॥ मद्रकारः॥ वेति वक्तव्ये अण्ग्रहणं हेत्वादिषु टो मा भूदिति॥ कथं तर्हि अल्पारंभः क्षेमकरः इति॥ कर्मणः शेषत्वविवक्षायां षष्ठ
घ्रा॥ आशिते भुवः करणभावयोः॥ आशितशब्द उपपदे भवतेः खच्॥ आशितो भवत्यनेनाशितंभवः ओदनः॥ आशितस्य भवनं॥

सि॰ कौ॰ उ॰ आशितंभवः। संज्ञायां भृतृवृजिधारिसहितपिदमः। विश्वं बिभर्त्तीति विश्वंभरः। विश्वंभरा। रथंतरं साम। इह रथेन तरतीति व्युत्पत्तिमात्रं। न
७४ त्ववयवार्थानुगमः। पतिंवरा कन्या। शत्रुंजयो हस्ती। युगंधरः पर्वतः। शत्रुंसहः। शत्रुंतपः। अरिंदमः। दमिः शमनार्थो। तेन सकर्मक
इत्युक्तं। मतांतरे तु अंतर्भावितण्यर्थोऽत्र दमिः। गमश्च। सुतंगमः। अंतात्यंताध्वदूरपारसर्वानंतेषु डः। संज्ञायामित्येकैकं निवृत्तं। ए
षु गमेर्डः स्यात्। डित्वसामर्थ्यादभस्यापि टेर्लोपः। अंतं गच्छतीत्यंतगः इत्यादि। सर्वत्रपन्नयोरुपसंख्यानं। सर्वत्रगः। पन्नं पतितं गच्छती
ति पन्नगः। पन्नमिति पद्यतेः क्तांतं क्रियाविशेषणं। उरसो लोपश्च। उरसा गच्छतीत्युरगः। सुदुरोरधिकरणे। सुखेन गच्छत्यस्मिन्निति सुगः। दु त्य
र्गः। अन्यत्रापि दृश्यत इति वक्तव्यं। ग्रामगः। डे च विहायसो विहादेशो वक्तव्यः। विहगः। आशिषि हनः। शत्रुं वध्यात् शत्रुहः। आशिषि
चयः किं। शत्रुघातः। दारावाहनोऽणंतस्य च टः संज्ञायां। दारावुपपदे आङ्पूर्वाद्धंतेरण् टकारश्चांतादेशो वक्तव्य इत्यर्थः। दार्वाघाटः। चा
रौ वा। चार्वाघाटः। चार्वाघातः। कर्मणि समि च। कर्मण्युपपदे संपूर्वाद्धंतेरुक्तं वा स्यात्। वर्णान्संहंतीति वर्णसंघाटः। वर्णसंघातः। पदसंघा
टः। पदसंघातः। अपे क्लेशतमसोः। अपपूर्वाद्धंतेर्डः स्यात्। अनाशीरर्थमिदं। क्लेशापहः पुत्रः। तमोपहः सूर्यः। कुमारशीर्षयोर्णि
निः। कुमारघाती। शिरसः शीर्षभावो निपात्यते। शीर्षघाती। लक्षणे जायापत्योष्टक्। हंतेष्टक् स्याल्लक्षणवति कर्तरि। जायाघ्न
ना। पतिघ्नी स्त्री। अमनुष्यकर्तृके च। जायाघ्नस्तिलकालकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतं। अमनुष्येति किं। आखुघातः शूद्रः। अ
यकपंबलसूदः पलंबघ्नः। शत्रुघ्नः। कृतघ्न इत्यादि। मूलविभुजादित्वात्सिद्धं। चोरघातो नगरघातो हस्तीति बाहुलकादणि। शक्तौ श्री
हस्तिकपाटयोः। हंतेष्टक् स्याच्छक्तौ द्योत्यायां। मनुष्यकर्तृकार्थमिदं। हस्तिघ्नो ना। कपाटघ्नश्चोरः। कवाटेति पाठांतरं। पाणिघताड ७५

घौ शिल्पिनि। हंतेष्टक् टिलोपः। घत्वं च निपात्यते पाणिताडयोरुपपदयोः। शिल्पिनि किं। पाणिघातः। ताडघातः। राजघ उपसंख्यानं।
राजानं हंतीति राजघः। आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। एषु च्व्यर्थेष्वच्व्यंतेषु कर्मसूपपदेषु कृञः ख्यु
न्स्यात्। अनाढ्यमाढ्यं कुर्वंत्यनेनाढ्यंकरणं। अच्वौ किं। आढ्यीकुर्वंत्यनेन। इह प्रतिषेधसामर्थ्याल्ल्युडपि नेति काशिका। भाष्यम
ते तु ल्युडपि स्यादेव। अच्वावित्युत्तरार्थम्। कर्तरि भुवः खिष्णुच्खुकञौ। आढ्यादिषु च्व्यर्थेष्वच्व्यंतेषु भवतेरेतौ स्तः। अनाढ्य आढ्यो भ
वति। आढ्यंभविष्णुः। आढ्यंभावुकः। स्पृशोऽनुदके क्विन्। घृतस्पृक्। कर्मणीति निवृत्तं। मंत्रेण स्पृशतीति मंत्रस्पृक्। ऋत्विग्दधृक्स्रगिति
व्याख्यातं। त्यदादिषु दृशोऽनालोचने कञ्च। समानान्ययोश्चेति वाच्यं। सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। क्सोऽपि वाच्यः। तादृक्षः
सदृक्षः। अन्यादृक्षः। सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेऽपि क्विप्। एभ्यः क्विप् उपसर्गे सत्यसति च सुप्युपपदे॥
प्रसत्। उपनिषत्। अंडसूः। प्रसूः। मित्रद्विट्। प्रद्विट्। मित्रध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। वेदवित्। निवित्॥
इत्यादि। अग्रग्रामाभ्यां नयतेर्णो वाच्यः। अग्रणीः। ग्रामणीः। भजो ण्विः। प्रभाक्। सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात्। अंशभाक्। प्रभा
क्। अदोऽनन्ने। विट् स्यात्। आममत्ति आमात्। सस्यात्। अनन्ने किं। अन्नादः। क्रव्ये च। अदेर्विट्। पूर्वेण सिद्धे वचनं अणो बाधनार्थं। क्र
श्री व्यात्। आममांसभक्षकः। कथं तर्हि क्रव्यादोऽस्रप आशुर इति। पक्वमांसशब्दे उपपदेऽण्। उपपदस्य क्रव्यादेशः पृषोदरादित्वात्। दुहः
कब्घश्च। कामदुघा। अन्येभ्योऽपि दृश्यंते। छंदसीति निवृत्तं। मनिन्क्वनिब्वनिपः विच्। एते प्रत्यया धातोः स्युः। नेड्वशि कृति।
वशादेः कृत इण् न स्यात्। सुशर्मा। प्रातरित्वा। विड्वनोरनुनासिकस्यात्। अनुनासिकस्यात् स्यात्। विजायत इति विजावा॥ ओ

(आतो मनिन्क्वनिब्वनिपश्च॥ २

सि॰ कौ॰ कृ॰
७५

भ्रूणः। अवावा। विच्। रोट्। रेट्। स्कृप्। क्विप् च। अयमपि दृश्यते। सत्सूद्विषेति त्वस्यैव प्रपंचः। उखास्रत्। पर्णध्वत्। वाहभ्रट्। अंतः॥ प
दांतस्यानितेर्नस्य णत्वं स्यात्। उपसर्गस्थान्निमित्तात्परश्चेत्। हे प्राण्। शासइदङ्हलोः इति इत्वं। मित्राणि शास्तीति मित्रशीः। आशासः क्वौ
उपधाया इत्वं वाच्यं। आशीः। इत्वोत्वे। गीः। पूः। इस्मन्त्रन्क्विषु च। एषु शादेशः स्यात्। नंदृठंतं। अनुनासिकस्य क्विझलोः क्ङिति दीर्घः॥
मो नो धातोः। प्रतान्। प्रशान्। च्छ्वोः शूडनुनासिके च। अक्षद्यूः। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। जूः। जुरौ। जुरः। तूः। तुरौ। तुरः। स्रूः। ऊः। ऊवौ। जनानवतीति जनौः
जुनावौ। जनावः। मूः। मुवौ। मुवः। स्कम्। स्कम्भौ। स्कम्भः। राल्लोपः। मूर्छा। मूः। मुरौ। मुरः। धुर्वी। धूः। धुरौ। गमः क्वौ॥ अनुनासिकस्य
लोपः स्यात्। अंगगत्। गमादीनामिति वक्तव्यं। परीतत्। संयत्। स्कनत्। ऊङ् च गमादीनामिति वक्तव्यं। लोपश्च। अग्रेगूः। अग्रेगत्रः
स्थः क च। चात् क्विप्। शंस्थः। शंस्थाः। शमि धातोरित्यचं बाधितुं सूत्रं। सुप्यजातौ णिनिस्ताच्छील्ये। अजात्यर्थे सुपि धातोर्णिनिः
स्यात् ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। अजातौ किं। ब्राह्मणानामंत्रयिता। ताच्छील्ये किं। उल्लंघ्य केकदाचित्। इह ताच्छीकारे
णोपसर्गेपि चेत् एव सुपि णिनिरिति व्याख्याय उत्प्रतिष्ठामाडिः सर्तेरुपसंख्यानमिति पठितं। हरदत्तमाधवादिभिस्त्वत्र वृत्ता
नुसृतं। एतच्च भाष्यविरोधादुपेक्ष्यं। प्रसिद्धश्चोपसर्गेपि णिनिः। सत्यस्थोपजीविनां। अनुयायिवर्गः। पतत्संघोषामविसारि। न च
नीयाः प्रस्थापनुजीविभिरित्यादौ। साधुकारिण्युपसंख्यानम्। ब्रह्मणि वदः। अताच्छील्यार्थं वार्त्तिकद्वयं। साधुवादी। ब्रह्मवादी।
कर्त्तर्युपमाने। णिनिः स्यात्। उपपदार्थः। कर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानम्। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वांक्षरावी। अता
च्छील्यार्थं जात्यर्थं च सूत्रं। कर्त्तरि किं। अपूपानिव भक्षयति माषान्। उपमाने किं। उष्ट्रः क्रोशति। व्रते। णिनिः स्यात्। स्थंडि

क्षुर संवरणे
दुर्णाक्रियाभिन्ना जातिः
शायी ३
श्रीः तीर्थकाकः
७५

लशायी। बहुलमाभीक्ष्ण्ये। पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः। क्षीरपायिण उशीनराः। मनः। सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी।
आत्ममाने खश्च। स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्यात्। चात् णिनिः। पंडितमात्मानं मन्यते पंडितंमन्यः। पंडितमानी। खि
त्यनव्ययस्य। कालिंमन्या। अनव्ययस्य किं। दिवामन्या। इच एकाचोम्प्रत्ययवच्च। इजंतादेकाचोम् स्यात् स च स्वाद्यम्वत्। खिदंते परे। औतो
म्शसोः। गांमन्यः। वाम्शसोः। स्त्रियंमन्यः। स्त्रीमन्यः। नरंमन्यः। स्त्र्वंमन्यः। श्रियं आत्मानं मन्यते श्रिमन्यं कुलं। भाष्यकारवचना
त्क्लीबस्य ह्रस्वः मुमुमारस्सावृभ्रा। भूते। अधिकारोयम्। वर्त्तमाने लडिति यावत्। करणे यजः। करणे उपपदे भूतार्थे यजेर्णिनिः
स्यात् कर्त्तरि। सोमेनेष्टवान्। सोमयाजी। अग्निष्टोमयाजी। कर्मणि हनः। पितृव्यघाती। कर्मणीत्येतत् हन्वेति यावदधिक्रियते।
ब्रह्मभ्रूणवृत्रेषु क्विप्। एषु कर्मसूपपदेषु हंतेर्भूते क्विप् स्यात्। ब्रह्महा। भ्रूणहा। वृत्रहा। क्विप् चेत्येव सिद्धे नियमार्थमिदम्। ब्रह्मादिषु
वा हंतेरेव। भूत एव। क्विबेवेति। चतुर्विधोत्र नियम इति काशिका। ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यं। सुकर्मपापमं
सु त्रपुण्येषु कृञः। कर्मादिषु च कृञः क्विप् स्यात्। त्रिविधोत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृत्। मंत्रकृत्। पुण्यकृत्।
क्विबेवेति नियमात्कर्मकृतवानित्यत्राण् न। कृञ एवेति नियमात् मंत्रमधीतवान् मंत्राध्यायः। अत्र न क्विप्। भूत एवेति निय
मात् मंत्रं करोति करिष्यतीति वेति विवक्षायां न क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप्। शास्त्रकृत्। भाष्य
कृत्। सोमे सुञः। सोमसुत्। चतुर्विधोत्र नियम इति काशिका। एवमुत्तरसूत्रेपि। अग्नौ चेः। अग्निचित्। कर्मण्यग्न्याख्या

सि॰ कौ॰ रु ७६ याम्॥ कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप् स्यात्। अभ्याधारस्थलविशेषस्याख्यायां। श्येन इव चितः श्येनचित्। कर्मणी
निविक्रियः। कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात्। कुत्सितग्रहणं कर्तव्यं। सोमविक्रयी। घृतविक्रयी॥ दृशेः क्वनिप्॥ कर्मणि दृशेते
इत्येव। पारं दृष्टवान् पारदृश्वा। राजनि युधि कृञः॥ क्वनिप् स्यात्। युधिरंतर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा।
सहे च। कर्मणीति निवृत्तम्। सहयुध्वा। सहकृत्वा॥ सप्तम्यां जनेर्डः॥ सरसिजम्। मंदुरायां जातो मंदुरजः। ङ्यापोरिति ह्रस्वः॥ पंचम्या
मजातौ॥ जातिशब्दवर्जिते पंचम्यंत उपपदे जनेर्डः स्यात्। संस्कारजः। अदृष्टजः॥ उपसर्गे च संज्ञायां॥ प्रजा स्यात्संततौ जने। अनौ क
रु र्मणि॥ अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्। पुमांसमनुजातः पुमनुजः॥ अन्येष्वपि दृश्यते॥ अन्येष्वप्युपपदेषु जनेर्डः स्यात्। अजः।
द्विजः। ब्राह्मणजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वंतरादपि कारकांतरेष्वपि क्वचित्। परितः खाता परिखा॥ क्त
क्तवतू निष्ठा॥ एतौ निष्ठासंज्ञौ स्तः॥ निष्ठा॥ भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र तयोरेवेति भावकर्मणोः क्तः। कर्तरि कृदिति कर्त्तरि क्तवतुः।
उकावितौ। स्नातं मया। स्तुतस्त्वया विष्णुः। विष्णुर्विश्वं कृतवान्॥ निष्ठायामण्यदर्थे॥ ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दी
र्घः स्यात्। क्षियो दीर्घात्॥ दीर्घात् क्षियो निष्ठातस्य नः स्यात्। क्षीणवान्। भावकर्मणोस्तु क्षितः कामो मया॥ श्र्युकः किति॥ श्रितः। श्रितवा
भूतवान् णुं न्। भूतः। भूतवान्। क्ष्णुतः। ऊर्णोर्नुवद्भावो वाच्यः। तेन एकाच्त्वान्नेट्। ऊर्णुतः। नुतः। स्तुतः॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः॥ रेफदकारा
भ्यां परस्य निष्ठातस्य नः स्यात्। निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च॥ शॄ हिंसायां॥ ऋत इत्वं रपरः णत्वं। शीर्णः। बहिरंगत्वेन श्रीः
द्वरासिद्धत्वान्नेह। कृतस्यापत्यं कार्त्तिः। भिन्नः। छिन्नः॥ संयोगादेरातो धातोर्यण्वतः॥ निष्ठातस्य नः स्यात्। द्राणः। ग्लानः। ल्वादिभ्यः। ए ७६

ते ३ यण्वसंयोगादेरादंता २

श्चि. कविंशतेर्ल्वादिभ्यः प्राग्वत्। लूनः। ज्या। यहिज्या। जीनः॥ दुग्वोर्दीर्घश्च॥ दुगतौ। दूनः। टुदु उपतापे इत्यस्य तु न गृह्यते। सानुबंधकत्वात्। मदुतस्य
दुतयेति माघः। गूनः। पूञो विनाशे। पूना यवाः। विनष्टा इत्यर्थः। पूतमन्यत्॥ सिनोतेर्ग्रासकर्मकर्तृकस्य॥ सिनो ग्रासः। ग्रासेति किम्। सिता पाश
न सूकरी। कर्मकर्तृकेति किं। सिता पाशा देवदत्तेन॥ ओदितश्च॥ भुजो भुग्नः। टुओश्वि शूनः। उच्छूनः। ओहाक्। प्रहीणः। स्वादय ओदित इत्युक्तम् कुमारस्येतोर्वा २
सूनः। सूनवान्। दूनः। दूनवान्। ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट्। उड्डीनः॥ द्रवमूर्तिस्पर्शयोः श्यः॥ द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्येङः संप्र
सारणं स्यात् निष्ठायाम्। श्योऽस्पर्शे॥ श्यैङो निष्ठातस्य नः स्यादस्पर्शार्थे। हल इति दीर्घः। शीनं घृतं। अस्पर्शे किं। शीतं जलं। द्रवमूर्तिस्पर्श
योरिति किं। संस्यानो वृश्चिकः। शीतात्संकुचित इत्यर्थः॥ प्रतेश्च॥ प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायाम्। प्रतिशीनः॥ विभाषाभ्यवपूर्वस्य॥
प्रवशीनः १ श्यः संप्रसारणं वा स्यात्। अभिश्यानं घृतम्। अभिशीनं। अवश्यानो वृश्चिकः। व्यवस्थितविभाषेयम्। तेनेह न। समवश्यानः॥ अंचोऽनपा
दाने॥ अंचो निष्ठातस्य नः स्यान्न त्वपादाने। यस्य विभाषा॥ यस्य क्वचित् विभाषा यदुदितस्ततो निष्ठाया इण्न स्यात्। उदितो वेति क्त्वायां वे
अंजितं ४ ट्कत्वात् इह नेट्। समक्नः। अनपादाने इति किम्। उदक्तमुदकं कूपात्। न त्वस्यासिद्धत्वाद्व्रश्चेति षत्वे प्राप्ते॥ निष्ठादेशः षत्वस्वरप्रत्ययवि
धिषु सिद्धो वाच्यः। वृक्णः। वृक्णवान्। परिस्कंदः प्राच्यभरतेषु॥ पूर्वपामूर्धन्यप्राप्ते तदभावो निपात्यते। परिस्कंदः। प्राच्येति किम्॥ प
रिष्कंदः। परिस्कंदः। परेश्चेति विकल्पः। स्कंन्देरिति षत्वे प्राप्ते॥ प्रतिस्तब्धनिस्तब्धौ च॥ अत्र षत्वं न स्यात्॥ दिवोऽविजिगीषायां॥ दिवो नि
२ क्षीणवान् ष्ठातस्य नः स्यात्। अविजिगीषायां। द्यूनः। विजिगीषायां तु द्यूतं॥ निर्वाणोऽवाते॥ अवात इति च्छेदः। निःपूर्वाद्वातेर्निष्ठातस्य नत्वं स्या
द्वातश्चेत्कर्त्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः॥ शुषः कः॥ निष्ठातस्य इत्यस्य शुष्कः॥ पचो वः॥ पक्वः॥ क्षायो मः॥ क्षामः॥

वरीयस्याद्धाहकस्मेत्यर्थः ५

सि॰कौ॰रू॰ २७

स्यः प्रपूर्वस्य। प्यास्त्यः संप्रसारणं स्यान्निष्ठायाम्। प्रस्त्योऽन्यतरस्याम्। निष्ठातस्य मो वा स्यात्। प्रस्तीमः। प्रस्तीतः। मार्तिकं। स्त्यानः। अनुप
सर्गात्फुल्लक्षीबकृशोल्लाघाः। त्रिफला। फुल्लः। निष्ठातस्य लत्वं निपात्यते। क्तवत्वेकदेशस्यापीदं निपातनमिष्यते। फुल्लवान्। क्षीबादि
षु तु क्तप्रत्ययस्यैव तलोपः। तस्यासिद्धत्वात्प्राप्तस्य इटोऽभावश्च निपात्यते। क्षीबो मत्तः। कृशस्तनुः। उल्लाघो नीरोगः। अनुपसर्गात्किं। आ
दितश्च। आकारेतो निष्ठाया इण्न स्यात्। ति च। चरफलोरत उत्स्यात्तादौ किति। प्रफुल्तः। प्रक्षीबितः। प्रकृशितः। प्रोल्लाघितः। कथं त
र्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति। फुल्ल विकसने पचाद्यच्। सूत्रे फुल्लादि निदर्शनार्थम्। उत्फुल्लसंफुल्लयोरुपसंख्यानं। नुदवि
दोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्। एभ्यो निष्ठातस्य नो वा स्यात्। नुन्नः। नुत्तः। विद विचारणे रौधादिक एव गृह्यते। उंदिना परेण साहच
र्यात्। विन्नः। वित्तः। वेत्तेस्तु विदितः। विद्यतेर्विन्नः। उंदी। श्वीदितो निष्ठायां। श्वयतेरीदितश्च निष्ठायामिण्न स्यात्। उन्नः। उत्तः। त्रा
णः। त्रातः। छिदि ऊर्त्तः। राल्लोपः। मूर्त्तः। मत्तः। वित्तो भोगप्रत्यययोः। विन्दतेर्निष्ठातस्य निपातोऽयं भोग्यप्रतीते चार्थे। वित्तं धनं। वित्तः।
पुरुषः। अन्ययोः किं। विन्नः। विभाषागमहनेति क्वसौ वेट्कृत्वादिहनेट्। भित्तं शकलं। भिन्नमन्यत्। ऋणमाधमर्ण्ये। ऋधातोः क्तेत
कारस्य नत्वं निपात्यते। अधमर्ण्यव्यवहारे। ऋतमन्यत्। स्फायः स्फी निष्ठायां। स्फीतः। इण् निष्ठायां। निरः कुषो निष्ठायां इट् स्यात्।
यस्य विभाषेति निषेधे प्राप्ते। पुनर्विधिः। निष्कुषितः। वसतिक्षुधोरिट्। आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात्। उषितः। क्षुधितः। अं
चेः पूजायां। पूजार्थादंचेः क्त्वानिष्ठयोरिट् स्यात्। अंचितः। गतौ तु अक्तः। लुभो विमोहने। लुभेः क्त्वानिष्ठयोरिट् स्यात्। न तु गार्ध्ये।
ब्धः लुभितः। गार्ध्ये तु लुब्धः। क्लिशः क्त्वानिष्ठयोः। इड्वा स्यात्। क्लिश उपतापे। नित्यं प्राप्ते विकल्पः। क्लिशू विबाधने। अस्य क्त्वायां विकल्पे
घ्राणः। घ्रातः। ह्रीणः। ह्रीतः। न ध्याख्यापृमूर्छिमदाम्। एभ्यो निष्ठातस्य नत्वं न। ध्यातः। ख्यातः। ६

इडनलोसौ सेवसिद्धमिति भावः २

सिद्धेपि निष्ठायां निषेधे प्राप्ते विकल्पः। क्लिष्टः। क्लिशितः। पूङश्च। पूङः क्त्वानिष्ठयोरिड्वा स्यात्। पूङः क्त्वा च। पूङः क्त्वानिष्ठा च सेट् किन्न स्यात्।
पवितः। पूतः। क्त्वाग्रहणमुत्तरार्थम्। नोपधादिसूत्रे हि क्त्वैव संबध्यते। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। एभ्यः सेण्निष्ठा किन्न स्यात्। श
यितः। शयितवान्। अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेश्यितः। शेश्यितवान्। आदिकर्मणि निष्ठा वक्तव्या। आदिकर्मणि क्तः कर्तरि च।
आदिकर्मणि यः क्तः स कर्तरि स्यात्। चाद्भावकर्मणोः। विभाषा भावादिकर्मणोः। भावे आदिकर्मणि च आदितो निष्ठाया इड्वा स्यात्। प्रस्वि
दितश्चैत्रः। प्रस्वेदितं तेन। ञिष्विदेति भ्वादिरत्र गृह्यते। ञिक्ष्विदा साहचर्यात्। स्विद्यतेस्तु स्विदित इत्येव। ञिमिदा ञिक्ष्विदा दिवादी भ्वादी च।
प्रमेदितः। प्रमेदितवान्। प्रस्वेदितः। प्रस्वेदितवान्। प्रधर्षितः। प्रधर्षितवान्। धर्षितं तेन। सेट् किम्। प्रस्विन्नः। प्रस्विन्नं तेनेत्यादि।
मृषस्तितिक्षायां। सेण्निष्ठा किन्न स्यात्। मर्षितो मर्षितवान्। क्षमायां किं। अपमृषितं वाक्यं। अविस्पष्टमित्यर्थः। उदुपधाद्भावादिक
र्मणोरन्यतरस्याम्। उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात्। द्युतितं। द्योतितं। मुदितं। मोदितं। साधने प्रद्युतितः
प्रद्योतितः। प्रमुदितः। प्रमोदितः। साधु। उदुपधात्किं। विदितं। भावेत्यादि किं। रुचितं कार्षापणम्। सेट् किं। कुष्टं। शब्विकरणेभ्य
एवेष्यते। नेह। गुध्यतेर्गुधितं। निष्ठायां सेटि। णेर्लोपः स्यात्। भावितः। भावितवान्। श्वीदित इति नेट्। संप्रसारणं। शूनः। दीप्तः। गुहू।
गूढः। वन्तु। तनु। वनितः। पतः सनि वेट्कत्वादिट्साभावप्राप्ते। द्वितीया श्रितेति सूत्रे निपातनादिट्। पतितः। सेसिचीति वेट्कत्वाद्दि
ईहन्त सादीनाम्। नोदित्त्वेनानिस्य त्वज्ञापनात्। तेन धावितमभिसरराजधियेत्यादि। यस्य विभाषेत्यत्र एकाच इत्येव। दरिद्रितः।। स्क
१ लेन सादीनां यस्य विभाषेति इडभावे सिद्धे श्वीदितो निष्ठायामिति ईदित्त्वेन पुनस्तन्निषेधाज्ञापकाद्यस्य विभाषेति निषेधोऽनित्यः तेन पतितरसादिसिद्धं

सि. कौ. ७८

क्षुब्धस्वांतध्वांतलग्नम्लिष्टविरिब्धफांटबाढानि मंथमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ क्षुभ्यादीनां निष्ठांतानि निपात्यंते ॥ समु
दायेन मंथादिषु वाच्येषु द्रवद्रव्यसंपृक्ताः सक्तवो मंथः ॥ मंथनदंडश्च ॥ क्षुब्धः मंथश्चेत् ॥ स्वांतं मनः ॥ ध्वांतं तमः ॥ लग्नं सक्तं ॥ निष्ठानत्वमपि
निपातनात् ॥ म्लिष्टमविस्पष्टं ॥ विरिब्धः स्वरः ॥ म्लेछरेभ्योः अनयोरुपधाया इत्वमपि निपात्यते ॥ फांटमनायाससाध्यः कषायविशेषः ॥ प्र
माधवस्तु नवनीतभावानापन्नमागवस्थापन्नं द्रव्यं फांटमिति वेदभाष्ये आह ॥ बाढं भृशं ॥ अन्यत्र तु क्षुभितम् ॥ क्षुभ्वा राजति तु आगमशास्य आनि...तह
स्यानित्यत्वात् ॥ स्वनितं ॥ ध्वनितं ॥ लगितं ॥ म्लेछितं ॥ विरेभितं ॥ फणितं ॥ वाहितं ॥ धृषिशसी वैयात्ये ॥ एतौ निष्ठायामविनय एवानिटौ स्तः
धृष्टो विशस्तः ॥ अन्यत्र धर्षितम् ॥ विशसितः ॥ भावादिकर्मणोस्तु वैयात्ये धर्षिर्नास्ति अत एव नियमार्थमिदं सूत्रमिति वृत्तिः ॥ ध
षेरादित्त्वफलं चिंत्यमिति हरदत्तः ॥ माधवस्तु ॥ भावादिकर्मणोर्वैयात्ये विकल्पमाह ॥ धृष्टम् ॥ धर्षितम् ॥ प्रधृष्टः ॥ प्रधर्षितः ॥ दृढः स्थू
लबलयोः ॥ स्थूले बलवति च निपात्यते ॥ दृह दृहि वृद्धौ अस्मात्क्तस्येडभावश्च तस्य ढत्वं ॥ हस्य लोपः ॥ इदितो नलोपश्च ॥ दृंहितो दृंहितोन्यः ॥ प्र
भोपरिवृढः ॥ दृह दृहि वृद्धौ ॥ निपातनं प्राग्वत् ॥ परिवृढः ॥ परिवृंहितोन्यः ॥ कृच्छ्रगहनयोः कषः ॥ कषो निष्ठायामिण्न स्यात् ॥ एतयो
रर्थयोः ॥ कष्टं दुःखं तत्कारणं च स्यात् ॥ कष्टं कृच्छ्रमाभीलमित्यमरः ॥ कष्टो मोहः ॥ कष्टं शास्त्रं दुरवगाहमित्यर्थः ॥ कषितमन्यत् ॥ घु दुःखहेतुरित्यर्थः
षिरविशब्दने ॥ घुषिर्निष्ठायामनिट् स्यात् ॥ घुष्टा रज्जुः ॥ अविशब्दने किं ॥ घुषितं वाक्यं ॥ शब्देन प्रकटीकृताभिप्रायमित्यर्थः ॥ अ
र्देः संनिविभ्यः ॥ एतत्पूर्वादर्देर्निष्ठायामिण्न स्यात् ॥ समर्णः ॥ न्यर्णः ॥ व्यर्णः ॥ अर्दितोन्यः ॥ अभेश्चाविदूर्ये ॥ अभ्यर्णं ॥ नातिदूरम् ॥ आ श्रीः
सन्नं वा ॥ अभ्यर्दितमन्यत् ॥ णेरध्ययने वृत्तं ॥ ण्यंतात् वृत्तेः क्तस्येडभावो णिलुक् चाधीयमानेर्थे ॥ वृत्तं छंदश्छात्रेण संपादितं ॥ अधीत ७८
रुष्ट दुःखितन्का एणं चाद्यते कपालोऽर्थः ४

मितियावत् ॥ अन्यत्र तु वर्तिता रज्जुः ॥ शृतं पाके ॥ श्राति श्रपयत्योः क्ते शृभावो निपात्यते ॥ क्षीरहविषोः पाके ॥ शृतं क्षीरं स्वयमेव प्रक्लिन्नं पक्के
वेत्यर्थः ॥ क्षीरहविर्भ्यामन्यत्र तु ॥ श्राणा ॥ श्रपितं वा ॥ वादांतशांतपूर्णदस्तस्पष्टछन्नज्ञप्ताः ॥ एते णिजंता निष्ठांता वा निपात्यंते ॥ पक्षे दमितः ॥ श र
ष मितः ॥ पूरितः ॥ दासितः ॥ स्पाशितः ॥ छादितः ॥ ज्ञपितः ॥ रुष्यमत्वरसंघुषास्वनां ॥ एभ्यो निष्ठायामिड्वा स्यात् ॥ रुष्टः ॥ रुषितः ॥ अंतः ॥ अमि
तः ॥ तूर्णः ॥ त्वरितः ॥ अस्यादित्त्वफलं मंदं ॥ संघुष्टः ॥ संघुषितः ॥ आस्वांतः ॥ आस्वनितः ॥ हृषेर्लोमसु ॥ हृषेर्निष्ठायामिड्वा स्यात् ॥ लोमसु वि
षये ॥ हृष्टं ॥ हृषितं ॥ लोम ॥ विस्मितप्रतिघातयोश्च ॥ हृष्टो हृषितो मैत्रः ॥ विस्मितः ॥ प्रतिहतो वेत्यर्थः ॥ अन्यत्र तु हृषु अलीके ॥ उदित्वान्नि
ष्ठायां नेट् ॥ हृषलुष्टे इङ् ॥ अपचितश्च ॥ चायतेर्निपातोयं वा ॥ अपचितः ॥ अपचायितः ॥ प्यायः पी ॥ वास्यान्निष्ठायां ॥ व्यवस्थितविभाषेयं
तेन स्वांगे नित्यं ॥ पीनं मुखं ॥ अन्यत्र प्यानः पीनः ॥ स्वेदः ॥ सोपसर्गस्य न ॥ प्रप्यानः ॥ आङ्पूर्वस्यांधूधसोः स्यादेव ॥ आपीनोंधुः ॥ आपीन
मूधः ॥ ह्रादो निष्ठायाम् ॥ ह्रस्वः स्यात् ॥ प्रह्लन्नः ॥ द्यतिस्यतिमास्थामित्ति किति ॥ एषामिकारोंतादेशः स्यात् ॥ तादौ किति ॥ ईत्वदत्वयो
रपवादः ॥ दितः ॥ सितः ॥ मामाङ्मेङ् ॥ मितः ॥ स्थितः ॥ शाछोरन्यतरस्याम् ॥ शितः ॥ शातः ॥ छितः ॥ छातः ॥ व्यवस्थितविभाषात्वात् ॥ व्रते वि
षये श्यतेर्नित्यं ॥ संशितम् ॥ व्रतं सम्यक्संपादितमित्यर्थः ॥ संशितो ब्राह्मणः ॥ व्रतविषयकयत्नवानित्यर्थः ॥ दधातेर्हिः ॥ तादौ किति ॥ देइदस्यच
अभिहितं ॥ निहितं ॥ दो दद्घोः ॥ घुसंज्ञकस्य दा इत्यस्य दथ् स्यात् तादौ किति ॥ चर्त्वं ॥ दत्तः ॥ घोः किं ॥ दातः ॥ बांतोयमादेशः ॥ न चैवं विद
त्र भिस्यादो उपसर्गस्य दस्तीति दीर्घापत्तिः ॥ तकारादेस्तद्विधानात् ॥ दांतो धांतो वा न च दांत वैनिष्ठान्तः ॥ धांतत्वे सषस्तयोरि
ति धर्तशकम् ॥ सन्निपातपरिभाषाविरोधात् ॥ अच उपसर्गात्तः ॥ अजंतादुपसर्गात्परस्य दा इत्यस्य घोः अचस्तः स्यात्तादौ कि

सि॰ कौ॰ कृ॰ ति। न्यत्तं प्रत्तः। अवत्तः। अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि। सुदत्तमनुदत्तं च निदत्तमिति चेष्यते। चशब्दाद्यथाप्राप्तं। दस्ति।
७९ द्यन्तोपसर्गस्य दीर्घः स्यात्। दादेशोपस्तकारस्तादादौ तु रिपदे। खरि चेति चर्त्वं आश्रयात्सिद्धं। नीत्तं। सूत्तम्। घुमास्थेतीत्वं।
धेट्। धीतं। गीतं। पीतं। जनसनखनां सातं। जातं। सातं। खातं। अदो जग्धिर्ल्यप्तिकिति। ल्यबिति लुप्तसप्तमीकं। अदो जग्धिः स्यात्। ल्य
पि तादौ किति च। इकार उच्चारणार्थः। धत्वं। झरो झरि। जग्धः। आदिकर्मणि क्तः कर्तरि च। प्रकृतः कटं सः। प्रकृतः कटस्तेन। निष्ठा
यामण्यदर्थे इति दीर्घः। क्षियो दीर्घादिति नत्वम्। प्रक्षीणः सः। वाक्रोशदैन्ययोः। क्षियो निष्ठायां दीर्घो वा स्यात्। आक्रोशे दैन्ये च॥
क्षीणायुर्भव। क्षितायुर्भव। क्षीणोऽयं तपस्वी। क्षितो वा। निनदीभ्यां स्नातेः कौशले। आभ्यां स्नातेः सस्य षः स्यात्। कौशले गम्ये। निष्णातः
शास्त्रेषु। नदीष्णः। सुपीतिकः। सूत्रं प्रतिष्णातं। प्रतेः स्नातेः षत्वं। प्रतिष्णातं सूत्रं। शुद्धमित्यर्थः। अन्यत्र प्रतिस्नातं। कपिष्ठलो गोत्रे। कपिष्ठलो
नाम यस्य कापिष्ठलिः पुत्रः। गोत्रे किं। कपीनां स्थलं कपिस्थलं। विकुशमिपरिभ्यः स्थलं। एभ्यः स्थलस्य सस्य षः स्यात्। विष्ठलं। कुष्ठलं॥
शमिष्ठलं। परिष्ठलं। गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। एभ्यः कर्तरि क्तः स्यात्। भावकर्मणोश्च। गंगां गतः। गंगा
प्राप्तः। ग्लानः सः। लक्ष्मीमाश्लिष्टो हरिः। शेषमधिशयितः। वैकुण्ठमधिष्ठितः। शिवमुपासितः। हरिदिनमुपोषितः। राममनुजातः। गरुडमा
रूढः। विश्वमनुजीर्णः। पक्षे प्राप्ता गंगा तेनेत्यादि। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। एभ्योऽधिकरणे क्तः स्यात्। चाद्यथाप्राप्तं।
ध्रौव्यं स्थैर्यं। मुकुन्दस्यासितमिदमिदं यातं रमापतेः। भुक्तमेतदनन्तस्य सर्वं गोप्यादिदृष्टवः॥१॥ पक्षे आसेरकर्मकत्वात्कर्तरि सांस्त्व श्रीः ७९
आसितो मुकुन्दः। आसितं तेन। गत्यर्थेभ्यः कर्मणि कर्तरि च। रमापतिरिदं यातः। तेनेदं यातं। भुजेः कर्मणि। अनन्तेनेदं भुक्तं। कथं

भुक्ता ब्राह्मणा इति। भुक्तमस्ति एषामिति मत्वर्थीयोऽच्। वर्तमाने इत्यधिकृत्य। शीतं क्तः। ञिक्ष्विदा। क्ष्विण्णः। ञिइन्धी। इद्धः। मतिबुद्धिपूजार्थे
भ्यश्च। मतिरिच्छा बुद्धेः पृथगुपादानात्। राज्ञां मतः इष्टः। तैरिष्यमाण इत्यर्थः। बुद्धः। विदितः। पूजितः। अर्चितः। चकारोऽनुक्तसमुच्चयार्थः॥ शी
लितो रक्षितः। क्षान्तः। आक्रुष्टो जुष्ट इत्यादि। नपुंसके भावे क्तः। क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात्। जल्पितं। शयितं। हसितं। सु
भावे युजो। ईनिष्ठा। स्कनोतेर्यजेश्च वृद्धिनिष्पन्नानां क्वनिप्। स्कन्ता। स्कन्तानो। यज्वा। यज्वानो। जीर्यतेरतृन्। भूत इसेवं जरन्। जरन्तो जरन्तः। वासरूपन्या
येन निष्ठापि। जीर्णः। जीर्णवान्। छन्दसि लिट्। लिटः कानज्वा। क्वसुश्च। हेङ्भूतसामान्ये छन्दसि लिड्। तस्य विधीयमानौ कसुकानौ
चापि छान्दसाविति त्रिमुनिमतं। कवयस्तु बहुलं प्रयुञ्जते। तं तस्थिवांसं नगरोपकण्ठे। श्रेयांसि सर्वाण्यधिजग्मुषस्ते इत्यादि। वस्वेका
जाद्घसां। कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिड् नान्येषां। आदिवान्। आरिवान्। ददिवान्। जक्षिवान्। एषां किं। बभूवान्
भाषायां सदवसश्रुवः। सदादिभ्यो भूतसामान्ये भाषायां लिड्वा स्यात्। तस्य नित्यं क्वसुः। निषेदुषीमासनबन्धधीरः। अध्यूषुषस्तु
म भवन्त जनस्य। शुश्रुवान्। उपेयिवाननाश्वाननूचानश्च। एते निपात्यन्ते। उपपूर्वादिणो गत्यर्थाद्भूतमात्रे लिड्वा स्यात्। तस्य नि
त्यं क्वसुः। इट्। उपेयिवान्। उपेयुषः स्वामपि मूर्तिमग्र्यां। उपसृष्टा। उपेसविवक्षिते। ईयिवान्। समीयिवान्। नञ्पूर्वादश्नातेः क्वसुरि
ड्भावश्च। धृतं तद्वधतेरनाश्नुष इति भारविः। अनुपूर्वाद्वचेः कर्तरि कानच्। वेदस्यानुवचने कृतवाननूचानः। विभाषा गमहनविद
विशां। एभ्यो वसोरिड्वा। जग्मिवान्। जगन्वान्। जघन्वान्। जघ्निवान्। विविदिवान्। विविद्वान्। विविशिवान्। विविश्वान्। विस्मि

सि॰ कौ॰ कृ॰ नासाहवर्या हिंदतेर्यहण्यं। वेत्तेस्तु। विविद्वान्। दृशेश्चाद् दृशिवाच। ददृश्वान्। लटः शतृशानचावप्रथमासमानाधिकरणे॥ अप्रथमां
८० तेन समाधिकरण्ये सतीत्यर्थः। शबादि। पचंतं चैत्रं पश्य। आने मुक्। आगस्यातो मुमागमस्यादाने। पचमानं चैत्रं पश्य। लडिसन्नुवर्तमाने
पुनर्लड्ग्रहणं अधिकविधानार्थं। तेन प्रथमासामानाधिकरण्येपि क्वचित्। सन्ब्राह्मणः। माघ्याक्रोश इति वाच्यं। माजीवन्। माडि लु
डिति प्राप्ते एतद्वचनसामर्थ्याल्लट्। संबोधने च। हे पचन्। हे पचमान। लक्षणहेत्वोः क्रियायाः॥ क्रियायाः परिचायके हेतौ चार्थे वर्तमा
नाद्धातोर्लटः शतृशानचौ स्तः। शयाना भुंजते यवनाः। अर्जयन्वसति। हरिं पश्यन्मुच्यते। हेतुफलंकारणं च। कृत्यच्चः अपीयमाणः
सोमः। ईदासः॥ आसः परस्यानस्य ईत्स्यात्। आदः परस्य। आसीनः। विदेः शतुर्वसुः॥ वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात्। विदन्
विद्वान्। विदुषी॥ तौ सत्॥ तौ शतृशानचौ सत्संज्ञौ स्तः। लृटः सद्वा॥ व्यवस्थितविभाषेयं। तेनाप्रथमासामानाधिकरण्ये प्रत्य
योत्तरपदयोः संबोधने लक्षणहेत्वोश्च नित्यं। करिष्यंतं करिष्यमाणं पश्य। करिष्यतोपत्यं कारिष्यतः। करिष्यद्भक्तिः। हे करिष्य
न्। अर्जयिष्यन्वसति। प्रथमासमानाधिकरणेपि क्वचित् करिष्यति करिष्यन्। पूङ्यजोः शानन्॥ वर्तमाने। पवमानः। यजमानः॥
ताच्छील्यवयोवचनशक्तिषु चानश्॥ एषु द्योत्येषु कर्तरि चानश्। भोगं भुंजानः। कवचं बिभ्राणः। शत्रुं निघ्नानः। इङ्धार्योः शत्रकृ
च्छ्रिणि॥ आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि। अधीयन्। धारयन्। अकृच्छ्रिणि किं। कृच्छ्रेणाधीते। धारयतीति। द्विषो मित्रे॥ द्वि श्रीः
षन् शत्रुः। सुञो यज्ञसंयोगे। सर्वे सुन्वंतः। सर्वे यजमानाः सत्रिणः। अर्हः प्रशंसायां। अर्हन्। आक्वेस्तच्छीलतद्धर्मतत्साधुकारि ८०

कृ॰ ५

षु॥ क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्ताच्छील्यादिषु कर्तृषु बोध्याः। तृन्। कर्त्ता कटान्। अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रप
वृतुवृधसहचर इष्णुच्॥ अलंकरिष्णुः इत्यादि। णेश्छंदसि। वीरुधः पारयिष्णवः॥ भुवश्च। छंदसीत्येव। भविष्णुः। कथं तर्हि जगत्प्रभोरप्रभवि वि॰
ष्णु वैष्णवमिति। निरंकुशाः कवयः। चकारोनुक्तसमुच्चयार्थः। भ्राजिष्णुरिति वृत्तिः। एवं क्षयिष्णुः। नैतद्भाष्ये दृष्टं। ग्लाजिस्थश्च क्स्नुः॥ छंद स्नु
सीति निवृत्तं। गित्वयं न तु कित्। तेन स्थ ईत्त्वं न। ग्लास्नुः। गित्त्वान्न गुणः। जिष्णुः। स्थास्नुः। भाडुवः। श्युकः किती यत्र गकारप्रश्लेषान्नेट्॥
दंशेश्छंदस्युपसं॰ भूष्णुः। दंशेश्छंदस्युपसंख्यानं। दंक्ष्णवः पशवः॥ त्रसिगृधिधृषिक्षिपेः क्नुः॥ त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः॥ शमित्यष्टाभ्यो घिनुण्॥ सक नेट्वशिरु
र्मकेभ्यः अनभिधानात्। उकार उच्चारणार्थः इति काशिका। अनुबंध इति भाष्यं। तेन शमिनितरा शमिनीतरेत्यत्र उगितश्चेति ह्रस्ववि
कल्पः। न चैवं शमीशमिना विस्यादेतुम्प्रसंगः। हलग्रहणं अपकृष्य हलंतानामेव तद्विधानात्। नोदात्तोपदेशस्येति वृद्धिनिषेधः। श
क्षमी मी। तमी। दमी। श्रमी। भ्रमी। क्लमी। प्रमादी। उत्सर्वान्मदेः अलंकृञादिसूत्रेणेष्णुजुक्तो वासरूपविधिना घिनुणपि। उन्मादी। ताच्छीलि
केषु वासरूपविधिर्नास्तीति प्रायिकं। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमु
हदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च॥ घिनुण्स्यात्। संपर्की। अनुरोधी। आयामी। आय प॰
सी। परिसारी। संसर्गी। परिदेवी। संज्वारी। परिक्षेपी। परिराटी। परिवादी। परिदाही। परिमोही। प्रदोषी। द्वेषी। द्रोही। दोही। योगी
आक्रीडी। विवेकी। त्यागी। रागी। भागी। अतिचारी। अपचारी। आमोषी। अभ्याघाती। वौ कषलसकत्थस्रंभः॥ विकाषी। विलासी
विकत्थी। विस्रंभी। अपे च लषः। चाद्वौ। अपलाषी। विलाषी। प्रे लपसृद्रुमथवदवसः॥ प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादि

सि॰कौ॰कृ
६२

प्रवासी। निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्। पंचम्यर्थे प्रथमा। एभ्यो वुञ् स्यात्॥ निंदकः। हिंसकः।
इत्यादि। ण्वुला सिद्धे वुञ्वचनं ज्ञापकं ताच्छील्यादिषु वासरूपन्यायेन तृजादयो नेति। देविक्रुशोश्चोपसर्गे। आदेवकः। आक्रोशकः।
उपसर्गे किं। देवयिता। क्रोष्टा। चलनशब्दार्थादकर्मकाद्युच्। चलनार्थाच्छब्दार्थाच्च युच् स्यात्। चलनः। चोपनः। कंपनः। शब्दनः। र
वणः। अकर्मकात्किम्। पठिता विद्यां। अनुदात्तेतश्च हलादेः। अकर्मकाद्युच्। वर्त्तनः। वर्धनः। अनुदात्तेतः किम्। भसिता। हलादेः
किं। एधिता। अकर्मकात्किं। वसिता वस्त्रं। जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः। जु इति सौत्रो धातुः गतौ वेगे च। जवनः।
चंक्रमणः। दंद्रमणः। सरणः। पूर्वेणसिद्धे पदिग्रहणं लषपतपदेत्युकञा बाधा मा भूदिति तेन ताच्छीलिकेषु परस्परं वासरूपवि
धिर्नास्तीति तेनालंकृञस्तृन्न। क्रुधमंडार्थेभ्यश्च। क्रोधनः। रोषणः। मंडनः। भूषणः। नयः। यकारांताद्युच्न। क्नूयिता। क्ष्मायि
ता। स्यंदसूदीपदीक्षश्च। युच्न। स्यंदिता। दीपिता। दीक्षिता। नमिकंपीति परेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति ताच्छीलिकेषु
वासरूपविधिर्नास्तीति प्रायिकमिति तेन कम्रा। कमना। युवतिः। कंप्रा। कंपना शाखा। यदि सूदेर्युज्न। कथं मधुसूदनः। नं
द्यादिः। लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ्। लषुकः। पातुक इत्यादि। जल्पभिक्षकुट्टलुंटवृङः षाकन्। जल्पाकः।
भिक्षाकः। कुट्टाकः। लुंटाकः। वराकः। वराकी। प्रजोरिनिः। प्रजवी। प्रजविनौ। जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च।
जयी। दरी। क्षयी। विश्रयी। अत्ययी। वमी। अव्यथी। अभ्यमी। परिभवी। प्रसवी। स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्य आलुच्। श्रीः
आधास्त्रयश्चुरादावदंताः। स्पृहयालुः। गृहयालुः। पतयालुः। दयालुः। निद्रालुः। तत्पूर्वो द्रात दोनांतत्वं निपात्यते। तंद्रालुः। श्र २२

द्धालुः। शीङो वाच्यः। शयालुः। दाधेट्सिशदसदो रुः। दारुः। धारुः। सेरुः। शद्रुः। सद्रुः। सृघस्यदः क्मरच्। सृमरः। घस्मरः। अद्मरः। भंजभा
समिदां घुरच्। भंगुरः। भासुरः। मेदुरः। विदिभिदिच्छिदेः कुरच्। विदुरः। भिदुरः। छिदुरः। इण्नश्जिसर्तिभ्यः क्वरप्। इत्वरः। इत्वरी। न
श्वरः। जित्वरः। सृत्वरः। गत्वरश्च। गमेरनुनासिकलोपो निपात्यते। गत्वरः। गत्वरी। जागुरूकः। जागर्तेरूकः स्यात्। जागरूकः। यज
जपदशां यङः। एभ्यो यङंतेभ्य ऊकः स्यात्। दशामिति साविनानलोपेन निर्देशः। यायजूकः। जंजपूकः। दंदशूकः। नमिकंपिस्म्यजस
कमहिंसदीपो रः। नम्रः। कंप्रः। स्मेरः। जसिर्नञ्पूर्वः क्रियासातत्ये वर्त्तते। अजस्रं। संततमित्यर्थः। कम्रः। हिंस्रः। दीप्रः। सनाशंसभि
क्ष उः। चिकीर्षुः। आशंसुः। भिक्षुः। विंदुरिच्छुः। वेत्तेर्नुम् इषेश्छत्वं च निपात्यते। वेत्ति तच्छीलो विंदुः। इच्छति तच्छील इच्छुः। क्याच्छंदसि
देवांजिगाति सुम्नयुः। आदृगमहनजनः किकिनौ लिट् च। आदंताद्दृदंताद्गमादिभ्यश्च किकिनौ स्तश्छंदसि तौ च लिड्वत्। बभ्रि
र्वज्रं पपिः सोमं ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रमभिमित्रियं। जज्ञिः। भाषायां धाञ्कृसृगमिजनिनमिभ्यः। दधिः। चक्रिः। सस्रिः।
जग्मिः। जज्ञिः। नेमिः। सासहिवावहिचाचलिपापतीनामुपसंख्यानम्। यङंतेभ्यः सहादिभ्यः किकिनौ पूर्ववन्नीगभ्यासस्य निपात्यते
स्वपितृषोर्नजिङ्। स्वप्नक्। तृष्णक्। तृष्णजौ। तृष्णजः। धृषेश्चेति वाच्यमिति काशिकादौ। धृष्णक्। शृवंद्योरारुः। शरारुः। वंदारुः।
भियः क्रुक्लुकनौ। भीरुः। भीलुकः। क्रुकन्नपि वाच्यः। भीरुकः। स्थेशभासपिसकसो वरच्। स्थावरः। ईश्वरः। भास्वरः। पेस्वरः।
कस्वरः। यश्च यङः। यातेर्यङंताद्वरच् स्यात्। अतोलोपः। तस्य यलोपं प्रति स्थानिवत्त्वनिषेधाल्लोपो व्योर्वलीति यलोपः। अचोप

सि॰ कौ॰ ८८

स्वस्थानिवत्त्वमाश्रित्य आतोलोपप्राप्तौ। वेतुमं नस्थानिवत्। यायावरः॥ भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्वि
प्॥ विभ्राट्। भाः। भासौ। धूः। धुरौ। विद्युत्। ऊर्क्। पूः। पुरौ। दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः। जूः। जुवौ। ग्रावस्तुत्। ग्रावशब्दस्य
धातुना समासः। सूत्रे निपात्यते ततः क्विप्। आयतस्तूः। अन्येभ्योऽपि दृश्यते। क्विप्। छित्। भित्। दृशिग्रहणं विध्यन्तरोपसंग्र
हार्थं। क्वचिद्दीर्घः। क्वचिदसंप्रसारणं। क्वचिद्ध्रस्वः। तथा च वार्तिकं। क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसं
प्रसारणं च। क्विब्वचीत्यादिना उणादिसूत्रेण सिद्धे तद्वीलादौ तन्नाबाधानार्थमिति वार्तिके ग्रहणं। वक्तीति वाक्। पृच्छ
तीति प्राट्। आयतं स्तौति। आयतस्तूः। कटं प्रवते कटप्रूः। जूरुक्तः। श्रयतीति हरिं श्रीः। द्युतिगमिजुहोतीनां द्वे च। दृशिग्रह
णादभ्याससंज्ञा। दिद्युत्। जगत्। जुहोतेर्दीर्घश्च। जुहूः। दृ भये। अस्य ह्रस्वश्च। दीर्यतीति ददृत्। ध्यायतेः संप्रसारणं च। धीः॥
भुवः संज्ञान्तरयोः। मित्रभूर्नाम कश्चित्। धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः। विप्रसंभ्यो ड्वसंज्ञायां।
एभ्यो भुवो डुः स्यान्न तु संज्ञायां। विभुर्व्यापकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम कश्चित्। मितद्र्वादिभ्य उपसं
ख्यानं। मितं द्रवति मितद्रुः। शंभुः॥ अन्तर्भावितण्यर्थोऽत्र भवतिः॥ धः कर्मणि ष्ट्रन्। धेटो धाञश्च कर्मण्यर्थे ष्ट्रन् स्यात्। धात्री ज
नन्यामलकीवसुमत्युपमातृषु। दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। दाबादेः ष्ट्रन् स्यात् करणेऽर्थे॥ श्रीः
दात्यनेन दात्रं। नेत्रं। तितुत्रतथसिसुसरकसेषु च। एषां दशानां कृत्प्रत्ययानामिण्न स्यात्। शस्त्रं। योत्रं। योक्त्रं। स्तोत्रं। तोत्रं। से ८२

त्रं। सेक्त्रं। मेढ्रं। पत्रं। दंष्ट्रा॥ नद्ध्री॥ हलसूकरयोः पुवः। पूङ्पूञोः करणे ष्ट्रन् स्यात्। तच्चेत्करणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा
पोत्रं। मुखमित्यर्थः। अर्तिलूधूसूखनसहचर इत्रः। अरित्रं। लवित्रं। धवित्रं। सवित्रं। खनित्रं। सहित्रं। चरित्रं। पुवः संज्ञायां। पवित्रं। येना
ज्यमुत्पूयते यच्चानामिकावेष्टनं। कर्तरि चर्षिदेवतयोः। पुव इत्रः स्यात्। ऋषौ करणे देवतायां कर्तरि। ऋषिर्वेदमन्त्रः। तदुक्तमृषिणेति
दर्शनात्। पूयतेऽनेनेति पवित्रो। देवतायां तु अग्निः पवित्रं स मा पुनातु॥ ॥अथोणादयः॥ ॥श्रीः॥ कृवापाजिमिस्वदिसाध्यशूभ्य उण्।
करोतीति कारुः शिल्पी। कारकश्च। आतो युक्। वातीति वायुः। पायुर्गुदं। जयत्यभिभवति रोगान् जायुरौषधं। मिनोति प्रक्षिपति
देहे ऊष्माणमिति मायुः पित्तं। स्वादुः। साध्नोति परकार्यं साधुः। अश्नुते आशु शीघ्रं। आशुर्व्रीहिः पाटलः स्यात्। छन्दसीणः। मा न आयो। द
सनिजनिचरिचटिभ्यो ञुण्। दीर्यत इति दारु। स्नुः प्रस्थः सानुरस्त्रियां। जानु। जानुनी। इह जनिवध्योश्चेति न निषेधः। अनुबन्धद्वयसा
मर्थ्यात्। चारु रम्यं। चाटु प्रियं वाक्यं। मृगय्वादित्वात् कुप्रत्यये चटुरित्यपि। किंजरयोः श्रिणः। किं शृणातीति किंशारुः सस्यशूकं। बाण
श्च। जरामेति जरायुः गर्भाशयः। त्रो रश्च लः। तरन्त्यनेन वर्णा इति तालु। कृके वचः कश्च। कृकेन गलेन वक्तीति कृकवाकुर्मयूरश्च।
भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः। भरति बिभर्ति वा भरुः। स्वामी हरश्च। म्रियन्तेऽस्मिन् भूतानि
मरुः। निर्जलदेशः। शेते शयुरजगरः। तरुर्वृक्षः। चरन्ति भक्षयन्ति देवा इममिति चरुः। त्सरुः खड्गादिमुष्टिः। तनुः स्वल्पं। स्त्रियां मूर्तिः।
स्तनुः स्तनः। धनुः शस्त्रविशेषः। धनुर्नाच धनुर्विद्युः। धनुरिवाजनि वक्र इति श्रीहर्षः। मयुः किन्नरः। मद्गुः पानीयकाकिकेति
प्रसः। न्यङ्क्वादित्वात् कुत्वं। जस्त्वेन सस्य दः। अणश्च। कवले शकणा णवः। बाचाल्यादिशात्यां कटुः। चरति वदति वटुः। धान्यमिति

सि. कौ. स्वस्थानिवत्त्वमाश्रित्य आतो लोप इटि च। वेरेलुमं नस्थानिवत्। यायावरः। भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।
८२ विभ्राट्। भाः। भासौ। धूः। धुरौ। विद्युत्। ऊर्क्। पूः। पुरौ। दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः। जूः। जुवौ। क्वचः ग्रावशब्दस्य उ
धातुना समासः। सूत्रे निपात्यते। तत। क्विप्। आयतस्तुत्। अन्येभ्योऽपि दृश्यते। क्विप्। छित्। भित्। दृशिग्रहणं विध्यन्तरोपसंग्र छिद्रः
हार्थं। क्वचिद्दीर्घः। क्वचिदसंप्रसारणं। क्वचिद्द्वे। क्वचिद्ध्रस्वः। तथा च वार्तिकं। क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसं
प्रसारणं च। क्विब्वची सादिना उणादिसूत्रेषु पंचविंसिद्धेतच्छीलादौ तृन्बाधनार्थं आमादिति वार्तिके ग्रहणं। वक्तीति वाक्। पृच्छ
तीति प्राट्। आयतं स्तौति। आयतस्तूः। कटं प्रवते कटप्रूः। जूरुक्तः। श्रयतीति हरिं श्रीः। द्युतिगमिजुहोतीनां द्वे च। दृशिग्रह
स णादभ्यासंज्ञा। दिद्युत्। जगत्। जुहोतेर्दीर्घश्च। जुहूः। दॄ भये। अस्माद्ध्रस्वश्च। दीर्यतीति ददृक्। ध्यायतेः संप्रसारणं च। धीः।
भुवः संज्ञान्तरयोः। मित्रभूर्नाम कश्चित्। धनिकाधमर्णयोरंतरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः। विप्रसंभ्यो ड्वसंज्ञायां।
एभ्यो भुवो डुः स्यान्न तु संज्ञायां। विभुर्व्यापकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम कश्चित्। मितद्र्वादिभ्य उपसं
ख्यानं। मितं द्रवति। मितद्रुः। शंभुः। अंतर्भावितण्यर्थोऽत्र भवतिः।। धः कर्मणि ष्ट्रन्। धेटो धाञश्च कर्मण्यर्थे ष्ट्रन् स्यात्। धात्री ज
नन्यामलकीवसुमत्युपमातृषु। दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। दाबादेः ष्ट्रन् स्यात् करणेऽर्थे।। श्रीः
दासनेन दात्रं। नेत्रं। तितुत्रतथसिसुसरकसेषु च। एषां दशानां कृत्यानामिण्न स्यात्। शस्त्रं। योत्रं। योक्त्रं। स्तोत्रं। तोत्रं। से ८२

त्रं। सेक्त्रं। मेढ्रं। पत्त्रं। दंष्ट्रा।। नद्धी।। हलसूकरयोः पुवः। पूङ्पूञोः करणे ष्ट्रन् स्यात्। तच्चेत्करणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा
पोत्रं। मुखमित्यर्थः। अर्तिलूधूसूखनसहचर इत्रः। अरित्रं। लवित्रं। धवित्रं। सवित्रं। खनित्रं। सहित्रं। चरित्रं। पुवः संज्ञायां। पवित्रं। येना
ज्यमुत्पूयते यच्चानामिकावेष्टनं। कर्तरि चर्षिदेवतयोः। पुव इत्रः स्यात्। ऋषौ करणे देवतायां कर्तरि। ऋषिर्वेदमंत्रः। तदुक्तं। ऋषिणेति
दर्शनात्। पूयतेऽनेनेति पवित्रो। देवतायां तु अग्निः पवित्रं स मा पुनातु।। ।।अथोणादयः।। ।।श्रीः।। कृवापाजिमिस्वदिसाध्यशूभ्य उण्।
करोतीति कारुः शिल्पी। कारकश्च। आतो युक्। वातीति वायुः। पायुर्गुदं। जयत्यभिभवति रोगान् जायुरौषधं। मिनोति प्रक्षिपति
देहे उष्माणमिति मायुः। पित्तं। स्वादुः। साध्नोति परकार्यं साधुः। अश्नुते आशु शीघ्रं। आशुर्व्रीहिः पाटलः स्यात्। छंदसीणः। मान आयो। द
सनिजनिचरिचटिभ्यो ञुण्। दीर्यत इति दारु। स्नुः प्रस्थः सानुरस्त्रियां। जानु। जानुनी। इह जनिवध्योश्चेति न निषेधः। अनुबंधद्वयसा
ग्रि मर्थ्यात्। चारु रम्यं। चाटु प्रियं वाक्यं। मृगय्वादित्वात्कुप्रत्यये चटुरित्यपि। किंजरयोः श्रिणः। किं श्रणातीति किंशारुः सस्यशूकं। बाण
श्च। जरामेति जरायुः गर्भाशयः। त्रो रश्च लः। तरंत्यनेन नवर्णा इति तालु। कृके वचः कश्च। कृकेन गलेन वक्तीति कृकवाकुर्मयूरश्च।
सरटे चरणायुधश्च। भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः। भरति बिभर्ति वा भरुः। स्वामी हरश्च। म्रियंतेऽस्मिन्सत्वानि
मरुः। निर्जलदेशः। शेते शयुरजगरः। तरुर्वृक्षः। चरंति भक्षयन्ति देवा इमामिति चरुः। त्सरुः खड्गादिमुष्टिः। तनुः स्वल्पं। स्त्रियां मूर्तिः
स्तनुस्तनूः। धनुः शस्त्रविशेषः। धनुर्ना च धनुर्विदुः। धनुरिवाजनि वक्र इति श्रीहर्षः। मयुः किन्नरः। मद्गुः पानीयपक्षी। किंकेतिरे
मसः। न्यंक्वादित्वात्कुत्वं जश्त्वेन सस्य दः। अणश्च। कवले शकणा णवः। श्याव्याधिभ्यां कटुः। चपतिवद्धिवद्गुः। धान्यनिर

सि॰ कौ॰ क्षि॰ धान्ये वाच्ये णउ प्रत्ययः स्यात्स च नित्। निलादाकृदान्तः। प्रियंगव भ्रमेण वश्च मेघी हि भेदस्त्वणु पुमान्। निकुहणं फलिपादीत्यादि सू
त्रमपि व्याप्य संबध्यते। शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्च। शृणातीति शरुरायुधं क्रोधश्च। स्वरुर्वज्रम्। स्निहुर्व्या
धिः चंद्र इत्यन्ये। त्रपु सीसं। पुंसि सर्वमन्यत् स्वः प्राणाः। वसुर्द्दिवयोः। क्लेदुः शीतवस्कृतो यः घनमणौ। हनुर्वक्त्रैकदेशः। क्लेदुश्चन्द्रः। बंधुः म
नुः चात् विंदुरवयवविंदुः। स्यंदेः संप्रसारणं धश्च। देशेन द्रुविशेषध्वो सिंधुर्नो सरिति स्त्रियामब्धौ पुंसि। उंदेरिच्चादेः। उंदेति इंदुः
ईषेः किच्च। ईषेः उत्स्यात्स च कित्। आदेरिकारादेशश्च। इषतेर्हिनस्ति इषुः शरः। इषुर्द्वयोः। स्कंदेः सलोपश्च। कंदुः। सृजेरसुम्
च। चात्सलोपः उप्रत्ययश्च। रज्जुः। कृतेराद्यंतविपर्ययश्च। ककारतकारयोर्विनिमयः। तर्कुः सूत्रवेष्टनं। नावंचेः। न्यंकादित्वात्कु
त्वं। नियतिमंचतीति न्यंकुः मृगः। फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च। फल्गुः फल्गु। पाटिपटिः। पाटयतीति पटुः
नम्यतेऽनेनेति नाकुः वल्मीकं। मन्यत इति मधुः। जायत इति जतु। वलिर्गुकत्त्वा। वल संवरणे। वल्गु। धृषकित्सन्वच्च। वलेर्नेर्शिश्रुर्वो
कः। याद्वा यं पुरश्चो अश्वमेधीयः। सन्वदिति प्रकृतेर्द्वित्वं ग्रहणमित्तत्त्वं निरर्थं। कुर्षश्च। बभ्रुर्मुन्यंतरे विशेषो बभ्रुनकुलपिंगलो।
चादन्यतोऽपि। चक्षुः कर्त्ता। जघ्नुर्हंता। पपुः पालकः। घृसिदिव्याधिभ्यः धिधृषिभ्यः। कुःस्यात्। पुरुः। भिनत्तीति भिदुर्वज्रम्। प्रहिज्य
तिसंप्रसारणं। विराहणं विध्यतीति विधुः। राशां केकर्तुरेहणी केशोनराक्षसागृधुः। कामः। धृषुः दक्षः। कृग्रोरुच्च। करोतीति कुरुः
गृणातीति गुरुः। अपदुस्सुषु स्थः। अपष्ठ्वादिषु नेति षत्वं। अपष्ठु प्रतिकूलं। दुष्ठु। सुष्ठु। रपेरिच्चोपधायाः। आनिष्टं रपतीति रि श्री॰ ८३
पुः। अर्जिदृशिकम्यमिपंसिबाधामर्जिपशितुकधुक्दीर्घहकाराश्च। अर्जयति गुणानृजुः। सर्वान्विशेषेण पश्यती

श्यतेरुः स्यात्स च कित्सन्वच्च।

उप्रत्ययः स च कित

रप्रत्ययः स च निर्दिष्ट

तिपश्नुः। केतुः। अंधुः। कृपः। पांसुर्नानृद्धयोरजः। नालक्ष्म्यापिदं स्याश्च संबस्तूकरणं सवः। बाध्यत इति बाहुः स्त्रीपुंसयोर्भुजः। प्रथि
म्रदि स्वक्लानां संप्रसारणं सलोपश्च। त्रयाणां कुः संप्रसारणं त्रस्तेः सलोपश्च। पृथुः मृदुः। न्यंकादित्वात्कुत्वं। भ्रज्जतीति तपसा भृगुः। लं
घिवंह्योर्नलोपश्च। लघुः। वालमूललघ्वंगुलीनां वा लोरत्वमापद्यते। रघुर्नृपभेदः। बहुः। ऊर्णोतेर्नुलोपश्च। ऊरुः सक्थि।
महति ह्रस्वश्च। उरु महत्। श्लिषेः कश्च। श्लिषतीति श्लिकुर्धूर्त्तः। उद्यतो ज्योतिश्च। आङ्परयोः खनिशृभ्यां डिच्च। आखनतीति
आखुः। परं शृणातीति परशुः। पृषोदरादित्वादकारलोपात्पर्शुरपि। हरिमितयोर्द्रुवः। हरिमितयोर्द्रुवतेर्हरिद्रुर्वृक्षः। मितं द्रवतीति मि
तद्रुः समुद्रः। शते च। शतधा द्रवतीति शतद्रुः। बाहुलकात्केवलादपि। द्रुवः सूर्ध्वाभितिर्द्रुर्वृक्षः। शाखा च। तथा द्रुमः। खरुशंकुपी
युनीलंगुलिगु। पंचैते कुप्रत्ययांता निपात्यंते। खनतेरेफश्चांतादेशः। खरुः कामः। क्रूरो मूर्खः। अश्वश्च। शंकुर्नां कीलशल्ययोः
पिबतेरीत्वं युगागमश्च। पीयुर्वायसः। काकः स्कूर्णवा। निपूर्वाल्लुगि गतौ तस्मात्कुः। नेर्दीर्घश्च। नीलंगुः कृमिविशेषः। शृगालश्च
नीलांगुरित्यपि पाठांतरे। तत्र धातोरपि दीर्घः। लगेः संगेऽपस्य अत इत्त्वं च। लगतीति लिगुश्चित्तं। लिगुर्मूर्खः। मृगव्यादयश्च। एते कुप्रत्य
यांता निपात्यंते। मृगं यातीति मृगयुर्व्याधः। देवयुर्धार्मिकः। मित्रयुर्लोकयात्राभिज्ञः। आकृतिगणोऽयं। मंदिवाशिमथिचतिचंक्यं
किभ्य उरच्। मंदुरा वाजिशाला। वाशुरा रात्रिः। माथुरा। चतुरः। चंकुरा रथः। अंकुरः। खर्जूरादित्वादकूरोऽपि। व्यथेः संप्रसारणं कि
च्च। विथुरश्चोररक्षसोः। मकुरदर्दुरौ। मकुरो दर्पणः। बाहुलकान्मुकुरोऽपि। दृ विदारणे। धातोर्द्वित्वं च ने। अभ्यासस्य रुक् कटिलोपश्च। द
र्दुरस्तोयदभेके वाद्यभांडाद्रिभेदयोः। दर्दुरा चंडिकायां स्यात्। ग्रामजाले च दर्दुरमिति विश्वः। मद्गुरादयश्च। उरजंता निपात्यंते।

नदीभेदः

दृणाती भल्लात
दारभल्लात
कुः स जनित

सि·कौ·रू
८४

मायतेर्गुक्। मद्गुरो मत्स्यभेदः। कृत्र्वर्णे। रूमागमः। कर्बुरः। अन्येत्र रक्षसोः। बध्नातेः खर्ज्जूरादि त्वाच्छूरोपः। बंधूरं बंधुरोप्युन्नतानम्रसुंद
रयोस्त्रिषु। इतिरंति देवाः। का कतेर्वा कुकुः। कुक्कुर। कुक्कुरः। असेरुरन्। असुरः। प्रज्ञा धृष्ण। आसुरः। मसेश्च। पंचमे पादे मसेरुर
न्निति वक्ष्यते। मसूरा मसुरा ब्रीहिप्रभेदे पण्ययोषिति। मसूरा मसुरा या ना वेश्या ब्रीहिप्रभेदयोः। मसूरी पादरोगे स्यादुपधा
नेपुनः पुमान्। मसूरमसुरौ चूर्हाविति विश्वः। शावशे रांब्रो। श्वशुर इति आश्वर्थी। श्वशुरः। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु सो
पिता तयोः इत्यमरः। अविमह्योष्टिषच्। अविषः। महिषः। अमेर्दीर्घश्च। आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि। रुहे
र्वृद्धिश्च। रं कुशंबररोहिषाः। रोहिषो मृगभेदः स्यात्। रौहिषं च तृणं मतमिति संसारावर्त्तः। तवेर्णिद्वा। तवेति सौत्रो धातुः। तविष
ताविषावब्धौ स्वर्गे च। स्त्रियां तु तविषी ताविषी मेदी। देवकन्या स्त्री भिश्च। तविषी बलमिति वेदभाष्यं। नञि व्यथेः। अव्य
थिषोऽब्धिसूर्ययोः। अव्यथिषी धरा रात्र्यां। किलेर्बुक् च। किल्बिषं। इषिमदिमुदिखिदिछिदिभिदिमंदिचंदितिमिमिहिमुहिमुचिरु मुरि
चिरुधिबंधिशुषिभ्यः किरच्। इषिरोऽग्निः। मदिरा सुरा। मुदिरः कामुकाभ्रयोरिति विश्वमेदिन्यौ। खिदिरश्चंद्रः। छिद्रोसिकुठार रः
योः। भिदिरं वज्रं। मंदिरं गृहं। चंदिरश्चंद्रहस्तिनोः। तिमिरं तमः। अक्षिरोगश्च। मिहिरः सूर्यः। मुहिरः कामसस्ययोः। मुचिरोदा
ता। रुचिरं रुधिरं। बधिरः। शुष शोषणे। शुषिरं छिद्रं। शुष्कमित्यन्ये। अशेर्णित्। आशिरो वह्निरक्षसोः। अजिरशिशिरशि
थिलस्थिरस्फिरस्थविरखदिराः। अजेर्वीभावाभावः। अजिरमंगणं। शशेरुपधाया इत्वं। शिशिरं स्यादृतोर्भेदे तुषारे शीतले श्रीः
नुट्। घिद्यास्कुत्वं। रेक्णः स्कुवर्णो। चायतेरन्ने ह्रस्वश्च। चनो भक्तं। वृङ्शीङ्भ्यां रूपस्वांगयोः पुट् च। वर्पो रूपं। शेपो गुह्यं। स्रुरीभ्यां तुट् च। स्रो
तः। रेतः। पातेर्बले जुट् च। पाजः। पाजसी। उदके थुट् च। पाथः। अन्ने च। पाथो भक्तं। अदेर्नुम् धौ च। अदेर्भक्ते वाच्ये ऽसुन् नुमागमो धाद
शश्च। अंधोन्नं। स्कंदेः स्वांगे। स्कंधः। स्कंधसी। आपः कर्माख्यायां ह्रस्वो नुट् च वा। अप्नः। अपः। बाहुलकादापः। अपसी। रूपेर्जुट्। अद्य
रूपं। उदके नुम्भौ च। अंभः। नहेर्दिवि भश्च। नभः। इण आगअपराधे च। आगः पापापराधयोः। अमेर्हुक्च। अंहः। रमेश्च। रंहः। देशे
ह च। रमंते स्मिन्निति रंहः। अंचेर्ध्वंजियुजिभ्यः कुश्च। एभ्योऽसुन् स्यात् कवर्गश्चांतादेशः। अंकश्चिह्नं च। रीरयाः। अंगः। पक्षी। यो

गः समाधिः। भर्गः तेजः। भूरंजिभ्यां कित्। भुवः। रजः। वसेर्णित्। वासो वस्त्रं। चंदेरादेश्च छः। छंदः। पचिवचिभ्यां सुट् च। पक्षसी तु स्यते
पक्षो वृक्षो हृदयं। वहिहाधाञ्भ्यश्छंदसि। वक्षाः। अनड्वान्। हासाश्चंद्रः। धासाः पर्वतः। इति प्रांचः। वस्तेरस्त्रण्णिदित्यनुवर्तते। नतु सुट्
तेनवहेरुपधावृद्धिः इतरयोरातो युगिति युक्। शोषा धक्षु न वाहसा। श्रोता हवं गृणतः स्तोमवाहाः। विश्वो विहायाः। वाजं सरो विह
याः। देवानयत्पृथिवीं विश्वधायाः। अधारयत्पृथिवीं विश्वधायसं। धर्णसिं भूरिधायसं। इत्यादि। इणस्थासिः। अयाः। वह्निः। स्वरादिपा
ठादव्ययत्वं। मिथुने सिः पूर्ववच्च सर्वम्। उपसर्गविशिष्टो धातुर्मिथुनं। तत्रासुन्नोपवादोऽसिः स्वरार्थः। नञि हन एह च। अनेहसो। विधा
ञो वेध च। विदधातीति वेधाः। तुचो ऋद्। नोधाः। गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वं च। असिः स्यात्। रूतपाः। जातवेदाः। गतिकारको
पपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वप्राप्ते तत्पवादार्थमिदं। चंद्रे मो डित्। चंद्रोपपदान्माङोऽसिः स्यात्स च डित्।
चंद्रमाः। रजतममृतं च। वयसि धाञः। वयोधास्तरुणः। पयसि च। पयोधाः समुद्रो मेघश्च। पुरसि च। पुरोधाः। पुरूरवाः। पुरुशब्दस्य
दीर्घो रोत्तरसिश्च निपात्यते। चक्षेर्बहुलं शिच्च। नृचक्षाः। उषः किच्च। उषः। दमेरुनसिः। सप्तार्चिर्दमुनाः। अंगिराः। अंगेरुरसिरिरुडागम
श्च। अप्सराः। सर्त्तेरप्पूर्वादसिः। प्रायेणायं स्त्रियां अप्सरसः। विदिभुजिभ्यां विश्वे। विश्ववेदाः। विश्वभोजाः। वशेः कनसिः। संप्रस
रणं उशना॥ २४१॥ ॥ इत्युणादिषु चतुर्थः पादः॥ ॥ ७॥ अदिभुवो डुतच्। अद्भुतं। गुधेरूमः। गोधूमः। मसेरूरन्। मसूरः। प्रथमे पादे
असेरूरन् मसेश्चेत्यत्र व्याख्यातः। स्थः किच्च। स्थूरः। मनुष्यः। पातेरतिः। पातिः स्वामी। संपातिः पक्षिराजः। वातेर्नित्। वातिरादित्यसो
मयोः। अर्त्तेश्च। अरतिरुद्वेगः। वहेः क्लो हलोपश्च। तणं। इत्रस्तुट्। तितनिताडिभ्यउलच् तंडश्च। त्रियतेऽलुभ्यंते तन्यते ताड्यते इति वा तंडु त

स्वसत्वं
अनेहाः
स्वरसत्वं ई

सि॰ कौ॰ कृ॰ ६ ला:।दंसेष्टंर्टनोनश्चव।दासःसेवकश्चद्र्योः२दंश्चोश्च।दाशोधी वरः।उदिचेर्डैसिः।स्वरादिपाठादव्ययत्वम्।उच्चैः।नेर्दीर्घश्च।नीचैः
९७ सोरमैः।कोदमे पूर्वपदस्यन्दीर्घः।स्कमेःस्कपूर्वा वदमे वा च्यक्रःस्यात्।क्विवादनुनासिकलोपः।सूरतः।उपशांतः।दयालुश्च।पू
ञोयण्णुकह्रस्वश्च।यत्प्रत्ययः।पुण्यं।संसेःशिकुङ्किच्च।संसतेः।त्रिरादेशःयत्प्रत्ययः।कित्तस्यकुडागमश्च।शिक्यं।अर्त्तेःकुरुच्च।
दु उरणोमेषः।हिंसेरीरन्नीरचौ।हिंसीरो व्याघ्रदुष्टयोः।उदिदृणातेरजलोपूर्वपदांत्यलोपश्च।उदरं।डिवन मुड्चोदात्तः।अन्नुअन्न
चड्तिस्यात् धातोर्मुङ्सचोदात्तः।मुखं।अमेःसन्।अंसः।मुहेःखोमूर्च।मूर्खः।नहेर्हलोपश्च।नखः।शीङोह्रस्वश्च।शिखा।माङ्ऊखो
मयच्च।मयूखः।कलिगलिभ्यांफगस्योच्च।कुल्फः।शरीरावयवोरोगश्च।गुल्फः।पादग्रंथिः।स्पशेश्चणशुनौ पृच।स्वणशुनौ।।
प्रत्ययौपृषोदरादेशाः।पार्श्वास्त्रीकक्षयोरधः।पर्शुरायुधं।श्मनिश्रयतेर्डुन्।श्मन्शब्दो मुखवाची।मुखमाश्रयतइतिश्मश्रु।अश्रु
दयश्च।अश्रुनयनजलं।जनेष्टन्लोपश्च।जटा।अह्नतस्यजंघच।तस्यजनेःजंघादेशःस्यादद्व।जंघा।हंतेःशरीरावयवेद्वेच।जघ
नं।पश्चाद्भितंबस्त्रीकट्यांः।क्लि वृजघनंपुरः।क्लिशेरन्लोलोपश्च।लकारस्यलोपः।केशाः।फलेरितजादेश्चपः।पलितं।कनादिभ्यः
संज्ञायांवुन्।करकः।करका।कटकः।कटका।नरकं।नरकोनारकोपिचेतिद्विरूपकोशः।सरकं।गगनं।कोरकः।कोरकंच।चीकयत न
राद्यंतविपर्ययश्च।कीचकोवंशस्सदः।पचिमच्योरित्वोपधायाः।पचकः।मचकः।जनेररष्ठच।जठरं।चविमनिभ्यांचित्।चठरामूर्खः
मठरामुनिश्रोंडयोः।विदादिवान्माठरः।गर्गादिवान्माठर्यः।ऊर्जेर्दृणातेरलचौपूर्वपदांत्यलोपश्च।ऊर्दरःभूररक्षसोः।कुदरादयश्च श्रीः
कुदरः।कुसूलः।मदरं।बिलसत्।सूदरःसर्पः।हंतेर्घुनाद्यंतयोर्घत्वत।घतनोमारकः।क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च।कांतुःपक्षी ९७

गांतुःपथिकः।क्षांतुर्भशकः।हर्यतेःकन्यन्हिरच।कन्यन्प्रत्ययः।हिरण्यं।कञ्चःपासः।कर्पासः।बिल्वादित्वात्कार्पासंवस्त्रं।जनेस्करश्च।जर्तु
हस्तीयोनिश्च।ऊर्णोतेर्डः।ऊर्णा।दधातेर्यत्नुट्च।धान्यं।जीर्यतेःक्रिन्रश्चवः।जिव्रिःस्यात्कालपक्षिणोः।बाकुलकाज्जिवेरपि।तिदीर्घोन।मव्य
तेर्यलोपोमश्चापःपःडालुः।मव्यतेरालप्रत्ययःस्यात्तस्यापलुडागमः।धातोर्यलोपः।मकारश्चांत्यस्य।ममापताले विषये।ऋजेःकीकन्।
ऋजीकइंद्रोधूमश्च।तनोतेर्डउःसन्वच्च।तितउःपुंसिक्लीबेच।अर्त्तेःकद्युकपाकावयसि।ऋकद्दो।अतोबुन्मकारश्चांतादेशः।अथ्यः
कुकत्संप्रसारणंच।पिबतेःकन्।अवघावमाधमार्वरेफाःकुत्सिते।वदेर्नत्रियव।अवद्यं।अवतेरमः।वस्यपक्षेपः।अवमः।अधमः।अ
र्तेर्बन्।अर्वा।रिफतेःस्तोदादिकाद्रः।रेफः।लीरीङोह्रस्वःपुट्चतरौश्लेषणकुत्सनयोः।तरप्तौप्रत्ययौक्रमात्।धातोर्ह्रस्वःप्रत्ययस्यपुट्।लि
प्तं।श्लिष्टं।रिप्रं।कुत्सितम्।क्लिशेरीच्चोपधायाःकन्लोपश्चलोनाम्।क्लिशःकन्स्यात्।उपधायाईत्वं।लस्यलोपः।नामागमश्च।कीनाशः
यमः।किलफलेश्चेत्यं।अश्नोतेराशुकर्मणिवरट्च।चकारादुपधायाईत्वं।ईश्वरः।चतेरुरन्।चत्वारः।प्रातेररन्।प्रातः।अमेस्तुट्च।अन्त
र्मध्यं।दहेर्गोलोपोदश्चनः।गप्रत्ययःधातोरंत्यस्यलोपःदकारस्यनकारः।नगः।सिचेःसंज्ञायांहनुमोकश्च।सिंचतेःकप्रत्ययःहकारादेशः
सिंह:४ न: नुम्च।हिंसः।व्याङिघ्रातेश्चजातौ।कप्रत्ययःस्यात्।व्याघ्रः।हंतेरच्घुरच।घोरः।क्षमेरुपधालोपश्च।वादच्क्ष्मा।तनोतेर्डैः।त्रयः।त्रीन्।।य
हेरनिः।यहणिः।ङीषग्रहणीव्याधिभेदः।प्रथेरमच्।प्रथमः।चरेश्च।चरमः।मंगेरलच्।मंगलं।।२०।। ।।इत्युणादिषुपंचमःपादःसमाप्तः।।
श्रीमंगगच्छमर्द्धिंज्ञ यतितरां।। ।।श्रीः।। ।।उणादयोबहुलं।।एतेवर्त्तमानेसंज्ञायांचबहुलंस्युः।केचिदविहिताअप्युह्याः।संज्ञासुधातु
रूपाणिप्रत्ययाश्चततःपरं।।कार्याद्विद्यादनूबंधमेतच्छास्त्रमुणादिषु।।२।। भूतेपिदृश्यंते।भविष्यतिगम्यादयः।दाशगोघ्नौसंप्रदाने।ए

सि·कौ·कृ· ९८ तोसंप्रदाने कारके निपात्येते। दाशंति तस्मै दाशः। गां हंति तस्मै गोघ्नोऽतिथिः। भीमादयोऽपादाने। भीमः। भीष्मः। प्रस्कंदनः। प्रपक्षः। मूर्खः। ख
लतिः। ताभ्यामन्यत्रोणादयः। संप्रदानापादानपरामर्शार्थं ताभ्यामिति। तनोत्यसौ तंतुः। वृत्तं तदिति वर्त्म। चरितं तदिति चर्म। तुमुन्ण्वु
लौ क्रियायां क्रियार्थायां। क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः। मांतत्वादव्ययत्वं। कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति
अत्र वासरूपेण तृजादयो न। तुमुन्ण्वुलौ के। समानकर्तृकेषु तुमुन्। अक्रियार्थोपपदार्थमेतत्। इच्छार्थेषु एककर्तृकेषूपपदेषु धातोस्तु
मुन्स्यात्। इच्छति भोक्तुं। वष्टि वांछति वा। शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्। एषूपपदेषु धातोस्तुमुन्स्यात्। शक्नोति भो
क्तुं। एवं धृष्णोतीत्यादौ। अर्थग्रहणमस्तिनैव संबध्यते। अनंतरत्वात्। अस्ति भवति विद्यते वा भोक्तुं। पर्याप्तिवचनेष्वलमर्थेषु। पर्याप्तिः
पूर्णता। तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन्स्यात्। पर्याप्तो भोक्तुं। प्रवीणः। कुशलः। पटुरित्यादि। पर्याप्तिवचनेष्विति किं। अलं भु
क्तं। अलमर्थेष्विति किं। पर्याप्तं भुंक्ते। अत्र तन्न गम्यते। ननु भोक्तुं सामर्थ्यं। कालसमयवेलासु तुमुन्। पर्यायोपादानमर्थोपल
क्षणार्थं। कालार्थेषूपपदेषु तुमुन्स्यात्। कालः समयो वेला वा अनेहा वा भोक्तुं। प्रैषादिग्रहणमिहानुवर्तते। तेनेह न। भूतानि कालः
पचतीति वार्त्ता। भाववचनाश्च। भाववचनाधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः। यागाय याति। अण्क
र्मणि च। कर्मण्युपपदे क्रियार्थायां क्रियायामण्स्यात्। ण्वुलोपवादः। कांडलावो व्रजति। परत्वादयं कालादीन्बाधते। कंबलदायो व्र
जति। पदरुजविशस्पृशो घञ्। भविष्यतीति निवृत्तं। पद्यतेसौ पादः। रुजतीति रोगः। विशतीति वेशः। स्पृशतीति स्पर्शः। सृ स्थिरे। स श्रीः
इति लुप्तविभक्तिकं। सर्तेः स्थिरे कर्तरि घञ्स्यात्। सरति कालांतरमिति सारः। व्याधिमत्स्यबलेषु चेति वाच्यं। अतिसारो व्याधिः॥ ९८

सारो बले दृढांशे च

अंतर्भावितण्यर्थोऽत्र सरतिः। रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसारो मत्स्यः। सारो बलं। भावे। सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातो
र्घञ्स्यात्। पाकः। पाको। स्फुरतिस्फुलत्योर्घञि। अनयोरेच आत्वं स्यात्। स्फारः। स्फालः। उपसर्गस्य घञीति दीर्घः। परीहारः। इकः काशे। उ कानोर
त्तरपदे इगंतस्य प्रादेर्दीर्घः। नीकाशः। अनूकाशः। इकः किं। प्रकाशः। नोदात्तोपदेशात् न वृद्धिः। शामः। आचमोदस्तु आचामः। कामः। वामः
विश्राम इति तु पाणिनीयं। स्यदो जवे। स्यंदेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते। स्यदो वेगः। अन्यत्र स्यंदः। अवोदैधौद्मप्रश्रथहिम
श्रथाः। अवोदः। अवक्लेदनं। एधः। इंधनं। ओद्मः। उंदनं। श्रथनलोपश्च सावश्च। अकर्तरि च कारके संज्ञायां। कर्तृभिन्ने कारके घञ्स्या
त्। घञि च भावकरणयोः। रंजेर्नलोपः स्यात्। रागः। अनयोः किं। रज्यत्यस्मिन्निति रंगः। प्रास्यत इति प्रासः। संज्ञायामिति प्रायिकं। को भवता
लाभो लब्धः। इत उत्तरं भावे अकर्तरि च कारके इति कृत्यल्युटो बहुलमिति यावद्द्वयमप्यनुवर्तते। परिमाणाख्यायां सर्वेभ्यः। घञ्। अजपा
कारै। बाधनार्थमिदं। एकस्तंडुलनिश्चायः। द्वौ शूर्पनिष्पावौ। दारजारौ कर्तरि णिलुक्च। दारयंतीति दाराः। जारयंतीति जाराः। इङश्च। घञ्
अचोऽपवादः। उपेत्य अस्मादधीयते। उपाध्यायः। अपादाने स्त्रियामुपसंख्यानं। तदंतात् वा ङीष्। उपाध्याया। उपाध्यायी। श्रृवायुवर्ण
निवृत्तेषु। श्र इत्यविभक्तिको निर्देशः। शारो वायुः। करणे घञ्। शारो वर्णः। चित्रीकरणमिह धात्वर्थः। निश्रियंते। आश्रियते। अनेनेति
निवृत्तमावरणं। बाहुलकात्करणेक्तः। गोशिवा कृतनीशारः। प्रायेण शिशिरे क्लेशः। अकृतप्रावरण इत्यर्थः। उपसर्गे रुवः। घञ्। संर
रावः। उपसर्गे किं। रवः। अभिनिसः स्तनः शब्दसंज्ञायां। अस्मात्स्तनेस्सस्य मूर्धन्यादेशः। अभिनिष्टानो वर्णः। शब्दसंज्ञायां किं। अभि
निस्तनति मृदंगः। समियुद्रुदुवः। संयूयते मिश्रीयते गुडादिभिरिति संयावः। पिष्टविकारोऽपूपविशेषः। संद्रावः। संदावः। श्रिणीभु

वानुपसर्गे। श्रायः। नायः। भावः। अनुपसर्गे किं। प्रश्रयः। प्रणयः। प्रसवः। कथं प्रभावो नाम इति प्रकृष्टो भाव इति प्रादिसमासः। कथं राज्ञो न
यह्रति बाहुलकात्। वौ क्षुश्रुवः। विक्षावः। विश्रावः। वौ किं। क्षवः। श्रवः। अवोदोर्नियः। अवनायः। अधोनयनं। उन्नायः। ऊर्ध्वनयनं। उन्ने रूपमुन्नयः
य इति बाहुलकात्। प्रे द्रुस्तुस्रुवः। प्रद्रावः। प्रस्तावः। प्रस्रावः। प्रे किं। द्रवः। स्तवः। स्रवः। निरभ्योः पूल्वोः। निष्पूयते शूर्पादिना इति निष्पावो नि
धान्यविशेषः। अभिलावः। निरभ्योः किं। पवः। लवः। उन्न्योर्ग्रः। उद्गारः। निगारः। उन्न्योः किं। गरः। कॄ धान्ये। कॄ इत्यस्माद्धान्यविषयकाद् उन्न्यो
र्घञ्स्यात्। उत्कारो निकारो धान्यस्य विक्षेप इत्यर्थः। धान्ये किं। भिक्षोत्करः। पुष्पनिकरः। यज्ञे समि स्तुवः। समेत्य स्तुवंति यस्मिन्देशे छंदो
गाः स देशः संस्तावः। यज्ञे किं। संस्तवः परिचयः। प्रे स्त्रोऽयज्ञे। अयज्ञे इति छेदः। यज्ञे इति प्रकृतत्वात्। प्रस्तारः। अयज्ञे किं। बर्हिषः प्रस्तरः।
मुष्टिविशेषः। प्रथने वावशब्दे। विपूर्वात्स्तृणातेर्घञ्स्यात्। अशब्दविषये प्रथने। पटस्य विस्तारः। प्रथने किं। तृणविस्तरः। अशब्दे किं।
ग्रंथविस्तरः। छंदोनाम्नि च। स्त्र इत्यनुवर्तते। विष्टारपंक्तिश्छंदः। विस्तीर्यंते तस्मिन्नक्षराणीत्यधिकरणे घञ्। ततः कर्मधारयः। छंदोना
म्नि च। विपूर्वात्स्तृणातेर्घञ्। तस्य सस्य षत्वं स्याच्छंदोनाम्नीति षत्वं। उदि ग्रहः। उद्ग्राहः। समि मुष्टौ। मल्लस्य संग्राहः। मुष्टौ किं। द्रव्यस्य सं
ग्रहः। परिन्योर्नीणोर्द्यूताभ्रेषयोः। परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ्स्यात्। क्रमेण द्यूतेऽभ्रेषविषये। परिणायेन शारान्हंति स
नै मन्तान्नयतीत्यर्थः। एषोऽत्र न्यायः। उचितमित्यर्थः। द्यूताभ्रेषयोः किं। परिणयो विवाहः। न्ययो नाशः। परावनुपात्यय इणः। क्रमप्राप्तस्या
अनतिक्रमः नतिपातोऽनुपात्ययः। तव पर्यायः। अनुपात्यये किं। कालस्य पर्ययः। अतिपात इत्यर्थः। व्युपयोः शेतेः पर्याये। तव विशायः। राज्योपशायः। श्रो
पर्याये किं। विशयः। संशयः। उपशयः। समीपशयनं। हस्तादाने चेरस्तेये। हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते। पुष्पप्रचायः ९९ सामीप्य

परिपाटी अनुक्रमः२

हस्तादाने किं। वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति। अस्तेये किं। पुष्पप्रचयश्चौर्येण। निवासचितिशरीरोपसमाधानेष्वादेश्च कः। एषु
चिनोतेर्घञ्। आदेश्च ककारः। उपसमाधानं राशीकरणं। तत्र धात्वर्थः। अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः। निवासे। काशीनिकायः
चितौ। आकायमग्निं चिन्वीत। शरीरे। चीयतेऽस्मिन्नस्थ्यादिकमिति कायः। समूहे। गोमयनिकायः। एषु किं। चयः। चः कुः इति वक्तव्ये आदेरि
ति किं। यङ्लुकि आदेरेव यथा स्यादिति। गोमयानां निकेचायः। पुनः पुना राशीकरणं इत्यर्थः। संघे चानौत्तराधर्ये। चेर्घञ्। आदेश्च कः। भिक्षुनिका
यः। प्राणिनां समूहः संघः। अनौत्तराधर्ये किं। सूकरनिचयः। संघे किं। ज्ञानकर्मसमुच्चयः। कर्मव्यतिहारे णच्स्त्रियां। स्त्रीलिंगे भाववचने प्रत्य
स्त्रियामञ्। न कर्मव्यतिहारे। अत्र ऐच् न स्यात्। व्यावक्रोशी व्यावहासी। अभिविधौ भाव इनुण्। अणिनुणः। आदिवृद्धिः। इनण्यनपत्ये। सां व्या हो
राविणं वर्तते। आक्रोशेऽवन्योर्ग्रहः। अवनि एतयोर्ग्रहे घञ्स्याच्छापे। अवग्राहस्ते भूयात्। अभिभव इत्यर्थः। निग्राहस्ते भूयात्। बाध इत्यर्थः।
दि:खं आक्रोशे किं। अवग्रहः पदस्य। निग्रहश्चोरस्य। प्रे लिप्सायां। पात्रप्रग्राहेण चरति भिक्षुः। परौ यज्ञे। उत्तरः परिग्राहः। स्फ्यस्य नयदेः स्वीकरणं। नौ
वृ धान्ये। वृ इति लुप्तपंचमीकं। नीवाराः। धान्ये किं। निवारः कन्या। क्विन्विषयेऽपि बाहुलकाद् घञ्। प्रवरासि नीतिवत्। उदि श्रयतियौतिपूद्रुवः।
उच्छ्रायः। उद्यावः। उत्पावः। उद्द्रावः। कथं पतन्त्यंताः समुच्छ्रया इति बाहुलकात्। विभाषाङि रुप्लुवोः। आरावः। आरवः। आप्लावः। आप्लवः। अ
वे ग्रहो वर्षप्रतिबंधे। विभाषेति वर्त्तते। अवग्राहः। अवग्रहः। वर्षप्रतिबंधे किं। अवग्रहः पदस्य। प्रे वणिजां। प्रे ग्रहे घञ्वा वणिजां संबंधिवि
प्रत्ययार्थः। तुलासूत्रमित्यावत्। तुलाप्रग्राहेण चरति। तुलाप्रग्रहेण। रश्मौ च। प्रग्रहः। प्रग्राहः। वृणोतेराच्छादने। विभाषा प्र इत्येव। प्रावा
रः। प्रवरः। परौ भुवोऽवज्ञाने। परिभावः। परिभवः। अवज्ञाने किं। सर्वतो भवनं परिभवः। एरच्। चयः। जयः। भयादीनामुपसंख्यानं। नपुंसके

क्रोशिनित्यर्थः। सर्य्यैवर्षे। ऋदोरप्। करः। गरः। शरः। यवः। लवः। स्तवः। पवः। हस्तासनयोर्विष्टरः। अनयोर्विपूर्वात्स्तृस्यषत्वं निपात्यते। विष्ट
रो वृक्ष आसनं च। हस्तेति किं। वाक्यस्य विस्तरः। ग्रहवृदृनिश्चिगमश्च। अप्स्यात्। घञोऽपवादः। ग्रहः। वरः। दरः। निश्चयः। गमः। वशि
रण्योरुपसंख्यानं। वशः। रणः। घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थं। प्रस्थः। विघ्नः। द्विखप्रकरणे कृञादीनामिति वक्तव्यं।
चक्रं चिक्लिदं। चक्नसः। उपसर्गेऽदः। अप्स्यात्। घञपोश्च। अदो घस्लृ स्यात् घञि अपि च। प्रघसः। विघसः। उपसर्गे किं। घासः। नौ ण च। नौ
उपपदे अदेर्णः स्यात् अप् च। न्यादः। निघसः। व्यधजपोरनुपसर्गे। अप् स्यात्। व्यधः। जपः। उपसर्गे तु आव्याधः। उपजापः। स्वनहसोर्वा। अप् प
क्षे घञ्। स्वनः। स्वानः। हसः। हासः। अनुपसर्ग इत्येव। प्रस्वानः। प्रहासः। यमः समुपनिविषु च। एषु अनुपसर्गे च यमेरप् वा। संयमः। संयामः।
उपयमः। उपयामः। नियमः। नियामः। वियमः। वियामः। यमः। यामः। नौ गदनदपठस्वनः। अप् वा स्यात्। निगदः। निगादः। निनदः। निना
दः। निपठः। निपाठः। निस्वनः। निस्वानः। क्वणो वीणायां च। नौ अनुपसर्गे च वीणाविषयाच्च क्वणतेरप् वा स्यात्। वीणाग्रहणं प्राध्यर्थं। नि
क्वणः। निक्वाणः। क्वणः। क्वाणः। वीणायां तु प्रक्वणः। प्रक्वाणः। नित्यं पणः परिमाणे। अप् स्यात्। मूलकपणः। शाकपणः। व्यवहारार्थं मूल
कादीनां परिमितो मुष्टिर्बध्यते स इह विषयः। परिमाणे किं। पाणः। मदोऽनुपसर्गे। अप्। मदः। उपसर्गे तु उन्मादः। प्रमदसंमदौ हर्षे। हर्षे किं।
प्रमादः। समुदोरजः पशुषु। संपूर्वो ऽजिः समुदाये उत्पूर्वस्तु प्रेरणे तस्मात् पशुविषयकाद् अप् स्यात्। घञपोरिति वक्ष्यमाणेन वीभावो न। समजः प अ
शूनां संघः। उदजः पशूनां प्रेरणं। पशुषु किं। समाजो ब्राह्मणानां। उदाजः क्षत्रियाणां। अक्षेषु ग्लहः। अक्षशब्देन देवनं लक्ष्यते। तत्र श्रीः
पतपणरूपणया ह्यंतत्र ग्लह इति निपात्यते। अक्षस्य ग्लहः। व्याक्षुक्षीभिसरणग्लहामदीयत्र। अक्षेषु किं। पादस्य ग्रहः। प्रज २००

(वि हनः २)

नेसर्त्तेः। प्रजनः प्रथमगर्भग्रहणं। गवामुपसरः। कथमवसरः। प्रसर इति। अधिकरणे पुंसि संज्ञायामिति घः। ह्वः संप्रसारणं च न्यभ्युपविषु। निहवः।
अभिहवः। उपहवः। एषु किं। प्रह्वायः। आङि युद्धे। आहूयन्तेऽस्मिन्निति आहवः। युद्धे किं। आह्वायः। निपानमाहावः। आङ्पूर्वस्य ह्वयतेः संप्रसारणं
अप् वृद्धिश्चोदकाधारश्चेद्वाच्यः। आहावस्तु निपानं स्यादुपकूपजलाशये। भावेऽनुपसर्गस्य। अनुपसर्गस्य ह्वयतेः संप्रसारणमप् स्यात् भावे।
हवः। हनश्च वधः। अनुपसर्गाद्धन्तेर्भावे अप् स्याद्वधादेशश्चांतोदात्तः। वधेन दस्युं। चाद्घञ्। घातः। मूर्तौ घनः। मूर्त्तिः काठिण्यं तस्मिन्नभिधेये
हंतेरप् स्याद्घनश्चादेशः। अभ्रघनः। कथं सैंधवघनमानयेति। धर्मशब्देन धर्मो लक्ष्यते। अंतर्घनो देशः। वाहीकग्रामविशेषस्य संज्ञेयं। अंत
र्घणा इति पाठांतरं। अगारैकदेशे प्रघणः प्रघाणश्च। द्वारदेशे द्वौ प्रकोष्ठावलिंदौ। आभ्यंतरो बाह्यश्च। तत्र बाह्यं तर प्रकोष्ठे निपातनमिदं। प्रवि
शद्भिर्जनैः पादैः प्रकर्षेण हन्यत इति प्रघाणः। कर्मण्यप्। पक्षे वृद्धिः। उद्घनोऽत्याधानं। अत्याधानमुपरिस्थापनं। यस्मिन् काष्ठे अन्यानि का
निस्थापयित्वा तक्ष्यंते स उद्घनः। अधिकरणेऽप्। अपघनोऽङ्गं। अंगं शरीरावयवः स चेह न सर्वः किंतु पाणिः पादश्चेत्याहुः। करणे अप घ
नोऽन्यः। करणेऽयोविद्रुषु। एषु हन्तेः करणेऽप् स्यात् घनादेशश्च। अयो हन्यतेऽनेनेत्ययोघनः। विघनः। द्रुघनः। द्रुघण इत्यपि। पूर्वपदात् संज्ञा
यामिति णत्वं। संज्ञैषा कुठारस्य। द्रुर्वृक्षः। स्तम्बे क च। स्तम्बे उपपदे हन्तेः करणे कः स्यात्। अपक्षे घनादेशश्च। स्तम्बघ्नः। स्तम्बघनः। करण
इत्येव। स्तम्बघातः। परौ घः। परौ हन्तेरप् स्यात् करणे घशब्दश्चादेशः। परिहन्यतेऽनेनेति परिघः। परेश्च घाङ्कयोः। परेः रेफस्य लो वा स्यात्। घ ने
शब्दे अङ्कशब्दे च। पलिघः। पर्यङ्कः। पल्यङ्कः। इह तरप्तमपौ घ इति कृत्रिमस्य न ग्रहणं। व्याख्यानात्। उपघ्न आश्रये। उपपूर्वाद्धन्तेरप् स्यादु
पधालोपश्च। आश्रयशब्देन सामीप्यं लक्ष्यते। पर्वतेनोपहन्यते। सामीप्येन गम्यत इति पर्वतोपघ्नः। संघोद्घौ गणप्रशंसयोः। संह

सि॰कौ॰ कृ॰ २०२ ननं संघः। भावे अप्। उद्धन्यते उत्क्षिप्यते इति उद्घः। कर्मण्यग्न्यर्थानां बुद्ध्यर्थे चाऽइति ज्ञाने। निघो निमित्तं। समंतान्मितं निमित्तं। निर्विशेषं
हन्यंते ज्ञायंते इति निघाः वृक्षाः। सम आरोहपरिणाहा इत्यर्थः। ड्वितः क्त्रिः। अयं भाव एव स्वभावात्। क्त्रेर्मम्नित्यं। नित्यग्रहणात् क्त्रिर्मविषयः॥ म॰
अत एव क्त्र्यंतेन न विग्रहः। डुपचष् पाकेन निर्वृत्तं पक्त्रिमं। डुवप् उप्त्रिमं। ट्वितोऽथुच्। अयमपि स्वभावाद्भाव एव। टुवेपृ। वेपथुः। श्वयथुः। यज
याचयतविच्छप्रच्छरक्षो नङ्। यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। प्रश्ने चासन्नकाले इति ज्ञापकान्न संप्रसारणं। ङित्त्वं तु विश्नप्रश्न इत्यत्र गुणनि
षेधाय। रक्ष्णः। स्वपो नन्। स्वप्नः। उपसर्गे घोः किः। प्रधिः। अंतर्धिः। उपाधीयते तेनेन सोपाधिः। कर्मण्यधिकरणे च। कर्मण्युपपदे घोः किः
स्यात् अधिकरणेऽर्थे। जलानि धीयंते ऽस्मिं जलधिः। स्त्रियां क्तिन्। स्त्रीलिंगे भावादौ क्तिन् स्यात्। घञोऽपवादः। अजपौ तु परत्वाद्बाध्यते। कृतिः।
चितिः। स्तुतिः। स्फायी। स्फातिः। स्फीतिका मइति तु प्रामादिकं। कांताद्धात्वर्थे णिच्। सिध्य च इति वासमाधेयं। श्रुयजिषिस्तुभ्यः करणे। श्रू
यते ऽनया श्रुतिः। यजरिषश्च। इष्टिः। स्तुतिः। ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः। तेन नत्वं। कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः। ऋकादइतिया
गविभागात् क्तिन्निष्ठवः। प्रह्णतिः। तिच। दुर्तिः। फुल्तिः। वायुतेः क्तिन्निचिभावो वाच्यः। अपचितिः। संपदादिभ्यः क्विप्। संपत्। विपत्। आ
पत्। क्तिन्नपीष्यते। संपत्तिः। विपत्तिः। आपत्तिः। स्थागापापचो भावे। क्तिन् स्यात् अङोऽपवादः। प्रस्थितिः। उपस्थितिः। संगीतिः। संपीतिः। पक्तिः।
कथमवस्था संस्थेति। व्यवस्थायामिति ज्ञापकात्। ऊतियूतिजूतिसातिहेतिकीर्तयश्च। अवतेर्ज्वरत्वरेत्यूठ्। ऊतिः। स्वरार्थं वचनं। उदात्त इति
हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। इत्वाभावो निपात्यते। सनोतेर्वा जनसनखनां सञ्झलोः इति आत्वे सिद्धे स्वरार्थं निपा श्रीः
त्यते। हंतेर्हिनोतेर्वा हेतिः। कीर्तिः। व्रजयजोर्भावे क्यप्। इज्या। संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। समज्या २०२

दिभ्यः स्त्रियां भावादौ क्यप् स्यात् स चोदात्तः संज्ञायां। अजेः क्यपि वीभावो नेति वाच्यं। समजंति अस्यामिति समज्या। सभा। निषीदंत्य
स्यां निषद्या। आपणः। निपतंत्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यते ऽनयेति मन्या। गलपार्श्वशिरा। विदंति तया विद्या। सुत्या अ
भिषवः। शय्या। भृत्या। ईयते ऽनया इत्या शिबिका। कृञः श च। कृञ इति योगविभागः। कृञः क्यप् स्यात्। कृत्या। श च। चात् क्तिन्। क्रिया। कृतिः।
इच्छा। इषेर्भावे शः। यगभावश्च निपात्यते। इच्छा। परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानं। शे यक् च निपात्यते। परिचर्या। शुश्रूषा। प
रिसर्या परिसरणं। अत्र गुणो ऽपि। मृग अन्वेषणे चुरादावदंतः। अतो लोपः। णेर्लोपो ऽपि शे परे णिलोपः। मृगया। अटतेः शे यक् द्वित्वं दीर्घश्च ध
अटाट्या। जागर्तेरकारो वा। पक्षे शः। जागरा। जागर्या। अप्रत्ययात्। प्रत्ययांतेभ्यो धातुभ्यः स्त्रियामका स॰
र प्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या। गुरोश्च हलः। गुरुमतो हलंतात् स्त्रियामकारः स्यात्। ईहा। ऊहा। गुरोः किं। भक्तिः। हलः किं। नीतिः। सो
निष्ठायां सेट इति वक्तव्यं। नेह। आप्तिः। तितुत्रेति नेट्। दीप्तिः। तितुत्रेष्वग्रहादीनामिति वक्तव्यं। निगृहीतिः। निपठितिः। षिद्भिदादिभ्यो
ऽङ्। षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ्। जॄष्। जरा। त्रपूष्। त्रपा। भिदा विदारण एवायं। भित्तिरन्या। छिदा। मृजा। कृपेः संप्रसारणं च। कृ दा
पा। चिंतिपूजिकथिकुंबिचर्चश्च। अङ् स्यात्। युचोऽपवादः। चिंता। पूजा। कथा। कुंबा। चर्चा। आतश्चोपसर्गे। अङ् स्यात्। क्तिनोऽपवादः। प्रदा। उ
पदा। श्रदंतरोरुपसर्गवद्वृत्तिः। श्रद्धा। अंतर्धा। ण्यासश्रंथो युच्। अकारस्यापवादः। कारणा। हारणा। आसना। श्रंथना। घट्टिवंदिविदिभ्य
श्चेति वाच्यं। घट्टना। वंदना। वेदना। इषेरनिच्छार्थस्य। अन्वेषणा। परेर्वा। पर्येषणा। परीष्टिः। रोगाख्यायां ण्वुल् बहुलं। प्रच्छर्दिका। प्रवा
हिका। विचर्चिका। क्वचिन्न। शिरोऽर्तिः। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। आसिका। शायिका। इक्श्तिपौ धातुनिर्देशे। पचिः। पचतिः। वर्णा

त्कारः। निर्देश इत्येव। अकारः। ककारः। रादिफः। रेफः। मत्वर्थाच्छः। बहुलवचनादकारलोपः। मत्वर्थश्यः। इणजादिभ्यः। आजिः। आतिः
इञ्वपादिभ्यः। वापिः वासिः। स्वोभेदः। इक्कृष्यादिभ्यः। कृषिः। गिरिः। संज्ञायां। अत्र धातोर्ण्वुल्। उद्दालकपुष्पभंजिका। विभाषाख्यान
परिप्रश्नयोरिञ्च। परिप्रश्ने। आख्याने। च गम्ये इञ्स्याच्चाण्वुल्। विभाषोक्तेर्यथाप्राप्तमन्यदपि। कां त्वं कारिं कारिकां क्रियां कृत्यां कृ
तिं वा अकार्षीः। सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वा अकार्षं। एवं गणिं गणिकां गणनां। पाचिं पाचिकां पचां पक्तिं। पर्यायार्हर्णोत्पत्ति
षु ण्वुच्। पर्यायः परिपाटीक्रमः। अर्हणमर्हः योग्यता पर्यायादिषु द्योत्येषु ण्वुच् वा स्यात्। भवत आसिका। शायिका। अग्रगामिका।
भवानिक्षुभक्षिकामर्हति। ऋणे इक्षुभक्षिकां मे धारयसि उत्पत्तौ। इक्षुभक्षिका उदपादि। आक्रोशे नञ्यनिः। विभाषेति निवृत्तं। न
ञ्युपपदे अनिः स्यादाक्रोशे। अजीवनिः। तेशठस्यात्। अत्र याणिः। नपुंसके भावे क्तः। ल्युट् च। हसितं। हसनं। योगविभाग उत्त
रार्थः। कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखं। येन स्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट् स्यात्
पूर्वेण सिद्धे नित्यसमासार्थं वचनं। पयःपानं सुखं। कर्तुरिति किं। गुरोः स्नापनं सुखं। नेह। गुरुः कार्त्तीकिं तु कर्मीवायो। अजेर्वी
वा स्यात् यो। प्रवयणं। प्राजनं। करणाधिकरणयोश्च। ल्युट् स्यात्। इध्मप्रव्रश्चनः कुठारः। गोदोहनी स्थाली। खलः आक्करण
धिकरणयोरित्यधिकारः। अंतरदेशे। अंतः शब्दाद्धंतेर्नस्य णः स्यात्। अंतर्हणनं। देशे तु। अंतर्हननो देशः। अत्पूर्वस्येत्येव।
अंतर्घ्नंति। तपरः किं। अंतर्घातिः। अयनं च। अयननं स्य णो तः। शब्दात्परस्य। अंतरयणं। अदेश इत्येव। अंतरयनो देशः।
पुंसि संज्ञायां घः प्रायेण। छादेर्घेऽद्व्युपसर्गस्य। द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे। दंताश्छाद्यंते ऽनेन दंतच्छदः। प्र

दः। अद्व्यीतिकिं। समुपाच्छादः। आकुर्वंत्यस्मिन्निति आकरः। गोचरसंचरवहव्रजव्यजापणनिगमाश्च। घांता निपात्यंते। हलश्चेति वक्ष्यमाण
स्य घञोपवादः। गावश्चरंत्यस्मिन्निति गोचरो देशः। संचरंते ऽनेनसंचरः मार्गः। वहंत्यनेन वहः स्कंधः। व्रजः। व्यजः। तालवृंतं। निपातनाद्वी
भावोन। आपणः। पण्यस्थानं। निगच्छंत्यनेनेति निगमः छंदः। चात्कषः। निकषः। अवेत्तृस्त्रोर्घञ्। अवतारः। कूपादेः। अवस्तारो जवनिका।
हलश्च। हलंताद्घञ् स्यात् घापवादः। अपमृज्यते ऽनेन व्याध्यादिरित्यपामार्गः। धिमार्गः। सम्मूहनी। अध्यायन्यायोद्यावसंहाराधार
यायाश्च। अधीयंते ऽस्मिन्नध्यायः। नियंति। उद्युवंति संहरंति अनेन संहारः। विग्रहः। अवहाराधारावायानामुपसंख्यानं। उदंकोनु
दके। उत्पूर्वादंचतेर्घञ् स्यात् न त्वदके। घृतमुदच्यते उद्भियंते ऽस्मिन्निति घृतोदंकः। चर्ममयं भांडं। अनुदके किं। उदकोदंचनः। आलमाना
यः। आनीयंते ऽमत्स्यादयो ऽनेनेत्यानायः। जालमिति किं। आनयनः। खनो घच। चाद्घञ्। आखानः। आखनः। घिल्करणमन्यतो
ऽप्ययमिति ज्ञापनार्थं। तेन भगः पदमित्यादि। खनेः डुडवङ्कङ्इकवको वाच्याः। आखः। आखुः। आखनिकः। आखनिकवकः। ए
तेखनित्रवचनाः। ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्। करणाधिकरणयोरिति निवृत्तं। एषु दुःखसुखार्थेषूपपदेषु खल् स्यात्। तयो
रेवेति भावे कर्मणि च। कृच्छ्रे दुष्करः। कटो भवता। अकृच्छ्रे ईषत्करः सुकरः। निमिमीलियां खलचोरात्वं नेति वाच्यं। दुष्प्रमयः। दुष्प्र
मयः। सुविलयः। निमयः। मयः। लयः। उपसर्गात्खल्घञोः। उपसर्गादेव लभेर्नुम् स्यात् ईषत्प्रलंभः। दुष्प्रलंभः। सुप्रलंभः।
उपसर्गात्किं। ईषल्लभः। लाभः। न सुदुर्भ्यां केवलाभ्यां। उपसर्गांतररहिताभ्यां सुदुर्भ्यां लभेर्नुम् न स्यात् खल्घञोः। सुलभं
दुर्लभं। केवलाभ्यां किं। सुप्रलंभः। अतिदुर्लभः। कथं तर्हि। अतिसुलभमतिदुर्लभमिति। यदा स्वतीकर्मप्रवचनीयो तदा

सि॰कौ॰कृ॰ भविष्यति॥ कर्तृकर्मणोश्च भूकृञोः॥ कर्तृकर्मणोरीषदादिषु चोपपदेषु भूकृञोः खल् स्यात्। यथासंख्यं नेष्यते। कर्तृकर्मणोश्च
२०३ धातोरर्थं प्रधानं न प्रयोज्यम् ईषदादयस्तु ततः प्राक्। कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्। खित्वान्मुम्। अनाढ्येन आढ्येन दुःख
न भूयते दुराढ्यंभवं। ईषदाढ्यंभवं। स्वाढ्यंभवं। दुराढ्यंकरः। स्वाढ्यंकरः। च्व्यर्थयोः किं। आढ्येन सूयते। आतो युच्। खलो
पं पवादः। ईषत्पानः सोमो भवता। दुःपानः। सुपानः। भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः। दुःशासनः। दुर्योधन
इत्यादि। घाल्पदांतात्। नस्य णत्वं। निष्पानम्। सर्पिष्पानं। घात् किं। निर्णय्य। पदांतात् किं। पुष्णाति। पदं अंतः पदांत इति सप्तमीस
मासोयं तेन हन्। सु सर्पिष्कः। आवश्यकाधमर्ण्ययोर्णिनिः। अवश्यंकारी। शतं दायी। कृत्याश्च। आवश्यकाधमर्ण्ययोर्वि
सेव। अवश्यं हरिः सेव्यः। शतं देयं। क्तिच्क्तौ च संज्ञायाम्। धातोः क्तिच् क्तश्च स्यादाशिषि संज्ञायां। तितुत्रेति नेट्। भव। तात
तिः। नन्ति। सिदीर्घश्च। अनिटां वनतितनोत्यादीनां च दीर्घो नुनासिकलोपानंतः क्तिचि परे। यंतिः। रंतिः। वंतिः। तंतिः। सनः क्ति
ने चि लोपश्चास्यान्यतरस्याम्। सनोतेः क्तिचि आत्वं वा स्याल्लोपश्च वा। सनुतात्। सातिः। सतिः। संतिः। देवा एनं देयासुः। देवदत्तः
अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। प्रतिषेधार्थयोरलंखल्वोः उपपदयोः क्त्वा स्यात्। प्राचां ग्रहणं पूजार्थम्। अमैवाव्ययेनेति
नियमान्नोपपदसमासः। दो दद्घोः। अलं दत्त्वा। घुमास्था। पीत्वा खलु। अलंखल्वोः किं। मा कार्षीत्। प्रतिषेधयोः किं। अलंकारः॥
उदीचां माङो व्यतीहारे। व्यतीहारार्थमाङः क्त्वा स्यात् पूर्वकालार्थमिदं। मयतेरिदन्यतरस्याम्। मेङ इकारोंतादेशः स्याद्वाल्यपि। अ श्रीः
पमित्य याचते। अपमाय। उदीचां ग्रहणाद्यथाप्राप्तमपि। पायाचित्वा अपमयते। परावरयोगे च। परेण पूर्वस्यावरेण परस्य योगे २०३

गम्ये धातोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः। परनदीयोगो पर्वतस्य। अतिक्रम्य पर्वतं नदी। अवरपर्वतयोगो नद्याः। समानकर्तृकयोः गो
पूर्वकाले। समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति। द्वित्वमतंत्रं। स्नात्वा भुक्त्वा पीत्वा व्रजति। अनु
कै दात्तेत्यनुदात्ते सिलोपः। विधुंनत्वा स्तोति। खरत्यादेरस्य फः क्तिती तिनिस मिङ्स्थानः सर्वविप्रतिषेधेन। स्फुत्वा। स्फूत्वा। धृत्वा। स्कंदस्यं
सः। एतयोर्नलोपो न स्यात् क्त्वि परे। स्कंत्वा। उदित्वा विदित्वा। स्यंत्वा। स्यंदित्वा। न क्त्वा सेट्। सेट् क्त्वा किन्न स्यात्। शयित्वा। सेट् किं। कृत्वा। मृडमृ
दगुधकुषक्लिशवदवसः क्त्वा। एभ्यः सेट् क्त्वा कित् स्यात्। मृडित्वा। क्लिशः क्त्वानिष्ठयोः। क्लिशित्वा। क्लिष्ट्वा। उदित्वा। उषित्वा। रुदविदेति कित्व
रुदित्वा। विदित्वा। मुषित्वा। गृहीत्वा। नोपधात्थफांताद्वा। सेट् क्त्वा कित् स्याद्वा। श्रथित्वा। श्रंथित्वा। गुफित्वा। गुंफित्वा। नोपधात् किम्॥
रोकित्वा कोथित्वा। रिफित्वा। वंचिलुंच्यृतश्च। सेट् क्त्वा कित्स्यात्। वचित्वा। वंचित्वा। लुचित्वा। लुंचित्वा। ऋतित्वा। अर्तित्वा। तृषिमृषिकृषेः काश्यप सोः
लोकित्वा। कर्षित्वा स्य। एभ्यः सेट् क्त्वा कित्स्यात्। तृषित्वा। तर्षित्वा। मृषित्वा। मर्षित्वा। कृषित्वा। कर्षित्वा। रलो व्युपधाद्धलादेः संश्च। द्युतित्वा। द्योतित्वा। लि
खित्वा। लेखित्वा। व्युपधात् किं। वर्तित्वा। रलः किं। सेवित्वा। हलादेः किं। एषित्वा। सेट् किं। भुक्त्वा। वसतिक्षुधोरिट्। उषित्वा। क्षुधित्वा।
क्षोधित्वा। अंचेः पूजायामिति नित्यमिट्। अंचित्वा। गतौ तु अक्त्वा अपि। लुभित्वा। लोभित्वा। लुभो विमोहन इति इट्। विमोहने तु लु
ब्ध्वा। जृव्रश्च्योः क्त्वि। आभ्यां परस्य क्त्व इट् स्यात्। जरीत्वा। जरित्वा। व्रश्चित्वा। उदितो वा। उदितः परस्य क्त्व इड्वा। शमित्वा। अनुना
सिकस्य क्विझलोः क्ङिति दीर्घः स्यात्। शांत्वा। धूत्वा। देवित्वा। क्रमश्च क्त्वि। क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे। क्रांत्वा। क्रंत्वा। झलि किं।
क्रमित्वा। पूङश्चेति वेट्। पवित्वा। पूत्वा। जांतनशां विभाषा। जांतानां नशेश्च नलोपो वा स्यात् क्त्वि परे। भक्त्वा। भंक्त्वा। रक्त्वा। रंक्त्वा।

सि·कौ·ऊ

२०४

मस्जिनशोरिति नुम्। तस्य पक्षे लोपः। नष्ट्वा। नंष्ट्वा। रधादिभ्यश्चेति पक्षे। नशित्वा। क्त्वादावितिवाच्यं। नेह। अंजित्वा। ऊदित्वादिट्। पक्षे अक्त्वा। अं
क्त्वा। जनसनेत्यात्वं। खात्वा। खनित्वा। घतिस्यतीतीत्वं। दित्वा। सित्वा। मित्वा। स्थित्वा। दधातेर्हिः। हित्वा। जहातेश्च क्त्वि। हित्वा। हाङस्तु हात्वा॥
अदो जग्धिः॥ जग्ध्वा। समासेऽनञ्पूर्वे क्त्वो ल्यप्। अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। अनञ् किं। अकृत्वा। पर्युदासाश्र
यणान्नेह। परमकृत्वा। षत्वतुकोरसिद्धः। षत्वे तुकि च कर्तव्ये एकादेशः शास्त्रमसिद्धं स्यात्। कोऽसिचत्। इह षत्वं न। अधीत्य। प्रेत्य। ह्रस्वस्य पिति कृ
ति तुक्। वा ल्यपि। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो वा स्यात् ल्यपि। व्यवस्थितविभाषेयं। तेन मांतानां वा। नांतानित्यं व
नादीनां च नित्यं। आगत्य। आगम्य। प्रणत्य। प्रणम्य। प्रहत्य। प्रमत्य। प्रवत्य। वितत्य। अदो जग्धिः। अंतरंगानपि विधीन् बहिरंगोऽप
ल्यब् बाधते। जग्धिविधौ ल्यब्ग्रहणात्। तेन हित्वदत्वात्वेत्वदीर्घत्वरूठ इत्यादि ल्यपि न। विधाय। प्रदाय। प्रखन्य। प्रस्थाय। प्रक्रम्य।
आपृच्छ्य। प्रदीव्य। न ल्यपि। ल्यपि परे घुमास्थादेरीत्वं न। प्रधाय। प्रमाय। प्रगाय। प्रपाय। प्रहाय। प्रसाय। मिनातिमिनोतीत्या
त्वं। प्रमाय। निमाय। उपदाय। विभाषा लीयतेः। विलाय। विलीय। विलापः। उत्तीर्य। विचार्य। ल्यपि लघुपूर्वात्। लघुपूर्वाद्वर्णात्परस्य णे
रयादेशः स्यात् ल्यपि। विगणय्य। प्रणमय्य। प्रबेभिदय्य। लघुपूर्वात् किं। संप्रधार्य। विभाषापः। आप्नोतेर्णेरयादेशो वा स्यात् ल्यपि।
प्रापय्य। प्राप्य। क्षियः। क्षियो ल्यपि दीर्घः स्यात्। प्रक्षीय। ल्यपि च। वञो ल्यपि संप्रसारणं न स्यात्। प्रवाय। ज्यश्च। प्रज्याय। व्यश्च।
उपव्याय। विभाषा परेः। परेर्व्यो वा संप्रसारणं स्याल्ल्यपि। तुकं बाधित्वा परत्वाद्धल इति दीर्घः। परिवीय। परिव्याय। कथं मुखं श्रीः
व्यादाय स्वपिति। नेत्रे निमील्य हसतीति। व्यादानसन्मीलनोत्तरकाले हि स्वापहासयोरन्वयः। तदंशविवक्षया भविष्य २०४

त्ति। आभीक्ष्ण्येण णमुल् च। पौनःपुन्ये द्योत्ये पूर्वविषये णमुल् स्यात्। क्त्वा च। द्वित्वं। स्मारंस्मारं। नमति शिवं। स्मृत्वा। पायंपायं। भोजंभोजं
श्रावंश्रावं। चिण्णमुलोरिति णमुल्परे णौ वा दीर्घः। गामंगामं। गमंगमं। विभाषा चिण्णमुलोरिति नुम् वा। लंभंलंभं। लाभंलाभं। व्यवस्थि
तविभाषया उपसृष्टस्य नित्यं नुम्। प्रलंभं। जाग्रोऽविचिण्णल्ङित्सु गुणः। जागरं। जागरं। ण्यंतस्याप्येवं। न यद्यनाकांक्षे। यच्छब्दे उपपदे पू
र्वकाले यत्त्वार्थं तन्न। यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकांक्षते चेत्। यदयं भुंक्ते ततः पठति इह क्त्वाणमुलौ न। अनाकांक्षे इति किं। य
दयं भुक्त्वा व्रजति ततोऽधीते। विभाषाऽग्रेप्रथमपूर्वेषु। आभीक्ष्ण्य इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमु
लौ वास्तः। अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमं भोजं प्रथमं भुक्त्वा। पक्षे लडादयः। अग्रे भुंक्ते। ततो व्रजति। आभीक्ष्ण्ये तु पूर्वविप्रतिषे
धेन नित्यमेव विधिः। अग्रे भोजंभोजं। व्रजति। भुक्त्वा भुक्त्वा। कर्मण्याक्रोशे कृञः खमुञ्। कर्मण्युपपदे आक्रोशे गम्ये। चौरंकारमा
क्रोशति। करोतिरुच्चारणे। चोरशब्दमुच्चार्येत्यर्थः। स्वादुमि णमुल्। स्वाद्वर्थेषु कृञो णमुल् स्यात्। एककर्तृकयोः पूर्वकाले। पूर्वपद
स्य मांतत्वं निपात्यते। अस्वाद्वीं स्वाद्वीं कृत्वा भुंक्ते स्वादुंकारं भुंक्ते। संपन्नंकारं। लवणंकारं। संपन्नलवणशब्दौ स्वादुपर्यायौ। वा
सरूपेणान्तापि। स्वादुं कृत्वा। भुंक्ते। अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्। एषु कृञो णमुल् स्यात्। सिद्धः अप्रयोगोऽस्य एवंभूतश्चे
त् कृञ्। व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः। अन्यथाकारं। एवंकारं। कथंकारं। इत्थंकारं भुंक्ते। इत्थं भुंक्ते इत्यर्थः। सिद्ध इति किं। शिरोऽन्यथा कृ
त्वा भुंक्ते। यथातथयोरसूयाप्रतिवचने। कृञः सिद्धाप्रयोग इत्येव। असूयया प्रतिवचने। यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं त
वानेन। कर्मणि दृशिविदोः साकल्ये। कर्मण्युपपदे णमुल् स्यात्। कन्यादर्शं वरयति। सर्वाः कन्या इत्यर्थः। ब्राह्मणवेदं भोजयति।

सि॰कौ॰ह्र॰ २०५

पु

यंयंब्राह्मणंजानाति।लप्स्यतेविचारयतिवा।स्तृतंसर्वंभोजयतीत्यर्थः।यावतिविंदजीवोः।यावद्वेदंभुंक्ते।यावल्लभतेतावद्भुंक्तइत्यर्थः।या-
वज्जीवमधीते।चर्मोदरयोःपूरेः।कर्मणीत्येव।चर्मपूरंस्तृणाति।उदरपूरंभुंक्ते।वर्षप्रमाणऊलोपश्चास्यान्यतरस्यां।कर्मण्युपपदेपू-
रेर्णमुल्स्यात्।ऊकारलोपश्चवा।समुदायेनवर्षप्रमाणंगम्यते।गोष्पदप्रंवृष्टोदेवः।गोष्पदपूरं।अस्यैतिकिं।उपपदस्यमाभूत्।मू-
षिका।बिलपूरं।चेलेक्नोपेः।चेलार्थेषुकर्मसूपपदेषुक्नोपेर्णमुल्स्यात्वर्षप्रमाणे।चेलक्नोपंवृष्टोदेवः।वस्त्रक्नोपं।वसनक्नोपं।
निमूलसमूलयोःकषः।कर्मणीत्येव।कषादिष्वनुप्रयोगंवक्ष्यति।अत्रप्रकरणेपूर्वकालइतिनसंबध्यते।निमूलकाषंकषति।स- अन्यथैव
मूलकाषंकषति।निमूलंसमूलंकषतीत्यर्थः।एकस्यापिधात्वर्थस्यनिमूलादिविशेषणसंबंधात्भेदः।तेनसामान्यविशेषभा-
वेनविशेषणविशेष्यभावः।शुष्कचूर्णरूक्षेषुपिषः।एषुकर्मसुपिषेर्णमुल्।शुष्कपेषंपिनष्टि।शुष्कंपिनष्टीत्यर्थः।चूर्णपेषं।रू-
क्षपेषं।समूलाकृतजीवेषुहन्कृञ्ग्रहः।कर्मणीत्येव।समूलघातंहंति।अकृतकारंकरोति।जीवग्राहंगृह्णाति।जीवतीतिजी-
वः।इगुपधलक्षणःकः।जीवंतंगृह्णातीत्यर्थः।करणेहनः।पादघातंहंति।पादेनहंतीत्यर्थः।यथाविध्यनुप्रयोगार्थंस्ननन्निस्यस्मा।
सार्थायंयणः।भिन्नधातुसंबंधेतुहिंसार्थानांचेतिवक्ष्यते।स्नेहनेपिषः।स्निह्यतेयेनतस्मिन्करणेपिषेर्णमुल्।उदपेषं
पिनष्टि।उदकेनपिनष्टीत्यर्थः।हस्तेवर्त्तिग्रहोः।हस्तार्थेकरणे।हस्तवर्त्तंवर्त्तयति।करवर्त्तंहस्तेनगुलिकांकरोतीत्यर्थः।हस्तग्रा-
हंगृह्णाति।करग्राहं।पाणिग्राहं।स्वेपुषः।करणइत्येव।स्वशब्दस्यार्थग्रहणंतेनस्वरूपपर्यायविशेषेषुणमुल्।स्वपोषंपुष्णाति श्रीः
धनपोषं।गोपोषं।अधिकरणेबंधः।चक्रबंधंबध्नाति।चक्रेबध्नातीत्यर्थः।संज्ञायां।बध्नातेर्णमुल्संज्ञायां।क्रौंचबंधंबद्धः २०५

मयूरिकाबंधंबद्धः।अट्टालिकाबंधं।बंधविशेषाणांसंज्ञाएताः।कर्त्रोर्जीवपुरुषयोर्नशिवहोः।जीवनाशंनश्यति।जीवोनश्यती-
त्यर्थः।पुरुषवाहंवहति।पुरुषोवहतीत्यर्थः।ऊर्ध्वेशुषिपूरोः।ऊर्ध्वेकर्त्तरि।ऊर्ध्वशोषंशुष्यति।वृक्षादिरूर्ध्वएवतिष्ठन्शुष्यतीत्यर्थः।ऊ-
र्ध्वपूरंपूर्यते।ऊर्ध्वमुखएवघटादिर्वर्षोदकादिनापूर्णोभवतीत्यर्थः।उपमानेकर्मणिच।चात्कर्त्तरि।घृतनिधायंनिहितंजलंघृतमिव
रक्षितमित्यर्थः।अजकनाशंनष्टः।अजकइवनष्टइत्यर्थः।कषादिषुयथाविध्यनुप्रयोगः।यस्माण्णमुल्कःसएवानुप्रयोक्तव्यइत्यर्थः
तथैवोदाहृतं।उपदंशस्तृतीयायां।इतःप्रभृतिपूर्वकालइतिसंबध्यते।तृतीयाप्रभृतीन्यन्यतरस्यामितिवासमासः।मूलकोपदंशंभुं-
क्ते।मूलकेनोपदंशं।दश्यमानस्यमूलकस्यभुजिंप्रतिकरणत्वात्तृतीया।यद्यप्युपदंशिनासहनशाब्दःसंबंधः।तथाप्यर्थोस्त्येवकर्मत्वा-
त्।एतावतैवसामर्थ्येनप्रत्ययःसमासश्चतृतीयायामितिवचनसामर्थ्यात्।हिंसार्थानांचसमानकर्मकाणां।तृतीयांतउपपदेऽनुप्रयोग-
धातुनासमानकर्मकाद्धिंसार्थाण्णमुल्स्याद्वा।दंडोपघातंगाःकालयति।दंडेनोपघातं।दंडताडं।समानकर्मकाणांकिं।दंडेनचोरमाहत्य
गाःकालयति।सप्तम्यांचोपपीडरुधकर्षः।उपपूर्वेभ्यःपीडादिभ्यःसप्तम्यंतेतृतीयांतेचोपपदेणमुल्स्यात्।पार्श्वोपपीडंशेते।पार्श्वयो-
रुपपीडं।पार्श्वाभ्यामुपपीडं।व्रजोपरोधंगाःस्थापयति।व्रजेनव्रजउपरोधंगाःस्थापयति।पाण्युपकर्षंधानाःसंगृह्णाति।पाणावुपक-
र्षं।पाणिनोपकर्षं।समासत्तौ।तृतीयासप्तम्योर्धातोर्णमुल्स्यात्सन्निकर्षेगम्यमाने।केशग्राहंयुध्यंते।केशेषुगृहीत्वा।हस्तग्राहं।ह-
स्तेनगृहीत्वा।प्रमाणेच।तृतीयासप्तम्योरित्येव।द्व्यंगुलोत्कर्षंखंडिकांछिनत्ति।द्व्यंगुलेनोत्कर्षं।अपादानेपरीप्सायां।परीप्सात्व-
रा।शय्योत्थायंधावति।द्वितीयायांचपरीप्सायामित्येव।यष्टिग्राहंयुध्यंते।लोष्टग्राहं।अपगुरोणमुलि।गुरीउद्यमनइत्यस्येच।

सि॰कौ॰ह॰ वा आस्याम्मुलि अस्यपत्कारं युध्यंते। अस्यपगारं। स्वांगेऽध्रुवे। द्वितीयायामित्येव। अध्रुवे स्वांगे द्वितीयांते धातोर्णमुल्। भ्रूविक्षेपं कथय
१०६ ति। भ्रूविक्षेपं। अध्रुवे किं। शिर उत्क्षिप्य। येन विना न जीवनं तद्ध्रुवं। परिक्लिश्यमाने च। सर्वतो विबाध्यमाने स्वांगे द्वितीयांते णमु
ल्स्यात्। उरःप्रतिपेषं युध्यंते। कृत्स्नमुरः पीडयंत इत्यर्थः। उरोविदारं प्रतिचस्करे नखैः। ध्रुवार्थमिदं। विशिपतिपदिस्कंदां व्याप्यमाना
सेव्यमानयोः। द्वितीयायामित्येव। द्वितीयांते उपपदे विश्यादिभ्यो णमुल् स्यात्। व्याप्यमाने आसेव्यमाने चार्थे गम्ये। गेहादिद्रव्याणां
रमा विशादिक्रियाभिः साकल्येन संबंधो व्याप्तिः। क्रियायाः पौनःपुन्यमासेवा। नित्यवीप्सयोरिति द्वित्वं तु न भवति। समासेनैवोक्त
त्वात्। यद्यप्याभीक्ष्ण्ये णमुल् कृत एव तथापि उपपदसंज्ञार्थमासेवायामिति पुनर्विधिः। गेहानुप्रवेशमास्ते। गेहं गे
हं अनुप्रवेशं। एवं गेहानुप्रपातं। गेहानुप्रपादं। गेहानुस्कंदं। असमासे तु गेहस्य णमुलंतस्य च पर्यायेण द्वित्वं। अस्यतितृषोः क्रि
यांतरे कालेषु। क्रियामंतरयति व्यवधत्त इति क्रियांतरः। तस्मिन्धात्वर्थे वर्तमानादस्यतेस्तृष्यतेश्च। कालवाचिषु द्वितीयांतेषू
पपदेषु णमुल् स्यात्। द्व्यहात्यासं गाः पाययति। द्व्यहमत्यासं। द्व्यहं तर्षं। अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते। अ
घ द्यपाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः। नाम्न्यादिशिग्रहोः। द्वितीयायामित्येव। नामादेशमाचष्टे। नामग्राहमाह्वयति
अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनं। उच्चैः कृत्वा। उ
च्चैः कृत्वा। उच्चैःकारं। अप्रियमाचष्टे। नीचैः कृत्य। नीचैः कृत्वा। नीचैःकारं। प्रियं ब्रूते। तिर्यच्यपवर्गे। तिर्यक्शब्दे उपपदे कृञः क्त्वा श्री:
णमुलौ स्तः समाप्तौ गम्यायां। तिर्यक्कृत्य गतः। तिर्यक्कृत्वा। तिर्यक्कारं। समाप्य गत इत्यर्थः। अपवर्गे किं। तिर्यक्कृत्वा काष्ठं ग १०६

तः। स्वांगे तस्प्रत्यये कृभ्वोः। मुखतः कृत्वा। मुखतः कृत्य। मुखतःकारं। मुखतोभूय। मुखतोभूत्वा। मुखतोभावं। नाधार्थप्रत्यये च्व्यर्थे।
नाधार्थप्रत्ययांते च्व्यर्थविषये उपपदे कृभ्वोः क्त्वाणमुलौ स्तः। अनाना नाना कृत्वा। नानाकृत्य। नानाकारं। विनाकृत्य। विनाकृत्वा।
विनाकारं। नानाभूय। नानाभूत्वा। नानाभावं। एकधाकृत्वा। अनेकं द्रव्यमेकं भूत्वा। एकधाभूय। एकधाभूत्वा। एकधाभावं। एकधा
कृत्य। एकधाकृत्वा। एकधाकारं। प्रत्ययग्रहणं किं। हिरुक्कृत्वा। पृथग्भूत्वा। तूष्णीमि भुवः। तूष्णींशब्दे भुवः क्त्वाणमुलौ स्तः। तूष्णींभू
य। तूष्णींभूत्वा। तूष्णींभावं। अन्वच्यानुलोम्ये। अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने। अन्वग्भूयास्ते। अ
न्वग्भूत्वा। अन्वग्भावं। अग्रतः पार्श्वतः पृष्ठतो वानुकूलो भूत्वा आस्त इत्यर्थः। आनुलोम्ये किं। अन्वग्भूत्वा तिष्ठति। पृष्ठतो भू
त्वेत्यर्थः। इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितं॥ विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे॥ १ ॥छ॥ ॥ ॥छ॥ ॥
भट्टोजीदीक्षितकृतिः सैषा सिद्धांतकौमुदी॥ प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः॥२॥ ॥छ॥ ॥ इति श्रीभट्टोजी
दीक्षितविरचितायां सिद्धांतकौमुद्यां उत्तरार्द्धं समाप्तं॥ ॥छ॥ लक्ष्मीनारायणार्पणमस्तु॥ ॥छ॥ ॥छ॥ ॥
॥ श्रीवक्रतुंडो जयतितरां॥ ॥ सच्चिदानंदस्वरूपो रामो जयतितमाम्॥ ॥छ॥ शुभमस्तु॥ ॥छ॥ ॥छ॥ ॥
॥ करा[illegible]फाराप नाम कगोविंदेन लिखितं॥ श्रीसच्चिदानंदस्वरूपोऽस्तु॥ श्रीसूर्यनारायणो जयतितरां॥ परोपकाराय अस्तु।
जयतितमाम्॥ भट्टोजीदीक्षि॥छ॥ तकृतिः से॥छ॥ षासिद्धांत॥छ॥ कौमुदी॥छ॥ प्रीत्यै भू॥छ॥ याद्भगव॥ तो॥छ॥र्भ॥छ॥ वानी॥छ॥ विश्वना
थयोः॥ ॥छ॥

141/14 (D)

इति व्याकरणपरिभाषा समाप्ता ।

+

नन्वेकांतत्वे नेकाल्त्वादेर्वैशद्दीनां सर्वादेशत्वसिध्यानेकाल्त्वे शिद्ग्रहणं व्यर्थमत आह ७ शिद्ग्रहणं ज्ञापकं। तेनार्वणस्तृ इत्यादेर्न सर्वादेशत्वं॥

श्रीगणेशायनमः॥ व्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणं १ नहिकार्यीनिमित्तत्वेनाश्रीयते २ कार्यमनुभवन्नेवकार्यीनिमित्तत्वेनना
श्रीयते ३ इतरेतराश्रयाणिकार्याणिनक्रियंते ४ यदागमास्तद्गुणीभूतास्तद्ग्रहणेनगृह्यंते ५ निर्दिश्यमानस्यादेशाभवंति ६ नानुबंधकृतम
नेकाल्त्वं ७ वर्णाश्रयेनास्तिप्रत्ययलक्षणं ८ क्वचिदेकदेशोप्यनुवर्तते ९ अर्थवद्ग्रहणेनानर्थकस्यग्रहणं १० नवर्णग्रहणेषु ११ भाव्यमानो
ण्सवर्णान्नगृह्णाति १२ यस्मिन्विधिस्तदादावल्ग्रहणे १३ विधिविधानविधिभाजांजयाणांसन्निपातेनतदंतविधिः १४ सन्नियोगशिष्टानां
सहवाप्रवृत्तिःसहैवानिवृत्तिः १५ उणादयोव्युत्पन्नानिप्रातिपदिकानि १६ सर्वोद्वंद्वोविभाषैकवद्भवति १७ उदित्सवर्णंगृह्णातिनसवर्णमात्रं
प्रकृतिवदनुकरणंभवति १८ विकरणेभ्योनियमोबलीयान् २० सकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवभवति २१ पुनःप्रसंगविज्ञा
नात्सिद्धं २२ अंतरंगबहिरंगयोरंतरंगंबलवत् २३ उभयनिर्देशेपंचमीनिर्देशोबलीयान् २४ सर्वेविधयःछंदसिविकल्प्यंते २५ प्रत्ययग्र
हणेयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणं २६ स्त्रीप्रत्ययेचानुपसर्जनेन २७ संज्ञाविधौप्रत्ययग्रहणेतदंतविधिर्नास्ति २८ प्रातिपदिक
ग्रहणेलिंगविशिष्टग्रहणं २९ विभक्तौलिंगविशिष्टाग्रहणं ३० सूत्रेलिंगवचनमतंत्रं ३१ नञिवयुक्तमन्यसदृशाधिकरणेतथाह्यर्थगतिः ३२

नन्वेवमपिकविषयेणोऽपिस्यादुक्तिरतआह ।। नानुबंध०

अवदातंमुखंअत्रपलोपीतस्यात्रेकृते
अदाबितिघुसंज्ञाप्रतिषेधोनस्यात् दैपः
पकारस्तेनअनैजंतत्वात् दाप्रास्यापलो
पीतुरपकारा
भावेनअस्य
दाप्तत्वाभावा
दित्यतआह

परिभाषा० १

गतिकारकोपपदानांकृद्भिःसहसमासवचनंप्राक्सुबुत्पत्तेः ३३ क्वचिदपवादविषयेऽप्युत्सर्गोभिनिविशते ३४ अंतरंगानपिविधीन्बहिरंगोल्यब्बाध
ते ३५ अस्तित्वसंभवोयदुभयंस्यात् ३६ कृत्यल्युट्तुमुन्खलर्थेषुवासरूपविधिर्नास्ति ३७ सांप्रतिकाभावेभूतपूर्वगतिः ३८ नानुबंधकृतमसा
रूप्यं ३९ लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवग्रहणंनतुलाक्षणिकस्य ४ एकदेशविकृतमनन्यवद्भवति ४१ क्वचिद्विकृतिरपिप्रकृतिंगृह्णाति ४२
बहुव्रीहौतद्गुणसंविज्ञानमपि ४३ ताच्छीलिकेषुवासरूपविधिर्नास्ति ४४ पुरस्तादपवादानंतरान्विधीन्बाधंतेनोत्तरान् ४५ नानुबंधकृतमनेजंत
त्वं ४६ चानुकृष्टंनोत्तरत्र ४७ मध्येऽपवादाःपूर्वान्विधीन्बाधंतेनोत्तरान् ४८ अनंतरस्यविधिर्वाभवतिप्रतिषेधोवा ४९ अकृतव्यूहाःपाणिनीयाः
५० कृतमपिकार्यंनिवर्तयंति ५१ निरनुबंधकग्रहणेनसानुबंधकस्यग्रहणं ५२ एकानुबंधकग्रहणेनद्व्यनुबंधकस्य ५३ तदनुबंधकग्रहणेनात
दनुबंधकस्य ५४ स्वरविधौव्यंजनमविद्यमानवत् ५५ क्रियाविशेषणानांकर्मत्वंनपुंसकलिंगतावा ५६ ग्रहणवताप्रातिपदिकेनतदंत
विधिर्नास्ति ५७ व्यपदेशिवद्भावोऽप्रातिपदिकेन ५८ समासप्रत्ययविधौतदंतप्रतिषेधउगिद्वर्णग्रहणवर्ज्यं ५९ स्वार्थिकाःप्रकृतितोलिंगव १
चनान्यनुवर्तंते ६० संप्रसारणंतदाश्रयंचकार्यंबलवत् ६१ उभयतआश्रयणेनांतादिवद्भावः ६२ वर्णाश्रयेविधौनांतादिवत् ६३ कृ

द्ग्रहणेगतिकारकपूर्वस्यापिग्रहणं ६४ समासांतविधिरनित्यः ६५ संनिपातलक्षणोविधिरनिमित्तंतद्विघातस्य ६६ अनिनस्मन्ग्रहणान्य
र्थवताचानर्थकेनचतदंतविधिंप्रयोजयंति ६७ वारणादांगंबलीयः ६८ योऽनादिष्टादचःपूर्वस्तस्यविधिंप्रतिस्थानिवद्भावः ६९ प्रकृतिग्रहणे
यङ्लुगंतस्यापिग्रहणं ७० असिद्धंबहिरंगमंतरंगे ७१ नाजानंतर्येबहिष्ट्वप्रकॢप्तिः ७२ संज्ञापूर्वकोविधिरनित्यः ७३ संनियोगवि
शिष्टानामन्यतरापायेउभयोरप्यपायः ७४ ताच्छीलिकेणेऽप्यण्कृतंभवति ७५ धातोःकार्यमुच्यमानंतत्प्रत्ययेभवति ७६ तन्म
ध्येपतितस्तद्ग्रहणेनगृह्यते ७७ अबाधकान्यपिनिपातनानिभवंति ७८ अंगाधिकारेयद्विहितंतत्तस्यचतदुत्तरपदस्यच ७९ प्रत्येकं
वाक्यपरिसमाप्तिः ८० क्वचित्समुदायेपिवाक्यपरिसमाप्तिः ८१ क्वचिदुभयथावाक्यपरिसमाप्तिः ८२ अभेदकाइहशास्त्रेगुणाः ८३
औपदेशिकप्रायोगिकयोरौपदेशिकस्यैवग्रहणं ८४ सर्वविधिभ्योलोपविधिर्बलीयान् ८५ लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यै
वग्रहणं ८६ भविष्यत्सूत्रेसहशास्त्राणिक्रियंते। ८७ अंतरंगानपिविधीन्बहिरंगोलुग्बाधते ८८ सत्यपिसंभवेबाधनंभवति ८९ पर्जन्य
वल्लक्षणप्रवृत्तिः ९० गर्भवद्भावाद्दोषोभवति ९१ विधौपरिभाषोपतिष्ठतेनानुवादे।। ९२ प्रकृतिग्रहणेण्यधिकस्यापिग्रहणंभवति ९३

अंगवृत्तेपुनर्वृत्तावविधिर्निष्ठितस्य ९४ पूर्वत्रासिद्धेनस्थानिवत्। उपजातनिमित्तोप्युत्सर्गोउपजनिष्यमाणनिमित्तेनापवादेनबाधते ९५
योर्नस्थानिवत् ९६ अभ्यासविकारेष्वपवादानोत्सर्गान्विधीन्बाधन्ते ९७ पूर्वत्रासिद्धीयमद्विर्वचने ९८ अनित्यमागमशासनं ९९ निमि
त्ताभावेनैमित्तिकस्याप्यभावः १०० गौणमुख्ययोर्मुख्येकार्यसंप्रत्ययः १ कृत्रिमाकृत्रिमयोःकृत्रिमेकार्यसंप्रत्ययः २ प्रधानाप्रधान
योःप्रधानेकार्यसंप्रत्ययः ३ उपपदविभक्तेःकारकविभक्तिर्बलीयसी ४ अवयवप्रसिद्धेःसमुदायप्रसिद्धिर्बलीयसी ५ दामादायहणे
अविशेषः ६ सामान्यातिदेशेविशेषस्यानतिदेशः ७ श्रुतानुमितयोःश्रुतसंबंधोबलवान् ८ पित्स्वराच्छित्संबंधोबलीयान् ९ वि
धिनियमेसंभवेविधिरेवबलीयान् १० प्रतिपदविधानाद्योगविभागोगरीयान् ११ सर्वविधिभ्योलोपविधिर्बलवान् १२ अंत्यबाधेंत्यसदे
शस्य १३ नानर्थकेऽलोन्त्यविधिः १४ प्रत्ययाप्रत्यययोःप्रत्ययस्यैवग्रहणं १५ सहचरितासहचरितयोःसहचरितस्यैवग्रहणं १६
यथोद्देशंसंज्ञापरिभाषं १७ कार्यकालंसंज्ञापरिभाषं १८ गणकार्यमनित्यं १९ संदेहेबहुवचनंप्रयोक्तव्यं २० अर्थवशाद्विभक्तिविपरिणामः २१
योगविभागादिष्टसिद्धिः २२ पर्यायशब्दानांगुरुलाघवचर्चानाद्रियते २३ व्यवस्थितविभाषयापिकार्याणिक्रियंते २४ अनिर्दिष्टार्थाःप्र

त्ययाःस्वार्थेभवंति २५ ज्ञापकसिद्धंनसर्वत्र २६ युगपदधिकरणवचनेद्वंद्वः २७ पूर्वंधातुःसाधनेनयुज्यतेपश्चादुपसर्गेण २८ पूर्वंधातुरु
पसर्गेणयुज्यतेपश्चात्साधनेन २९ समासतद्धितेषुसंबंधानमन्यत्ररूढ्यभिन्नरूपाव्यभिचारिसंबंधेभ्यः ३० इतिपरिभाषासमा
प्ताः॥ ॥श्रीशंकरायनमः॥ शुभंभवतु॥

इति व्याकरणपरिभाषा समाप्ता ।